A.C. Joshi Library
P.U. Chandigarh

MSS No. 343 C Subject Religion

Name of MSS श्रीमद् भागवत सटीक

Author शंकराचार्य

Period Folios 122.

Script Devnagiri Source Prithipal Singh.

Missing Folios 121 A

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तृतीयस्कांधः ३ पत्रे १२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

1

श्री भाग टी १

ॐ श्रीगणेशाय नमः ॥ ॐ ॥ तृतीये तु त्रयस्त्रिंशदध्यायैः सर्गवर्णनम् । ईशोदयाद्गुणक्षोभात्सर्गो ब्रह्माण्डसंभवः तत्र तत्र प
मेऽध्याये वैधुर्यैत्वाहताशुषः निर्गतस्योद्धवेनादौ संवादः स्वयमुच्यते प्रथमे तृतीयस्कंधव्याख्या भवाब्धेस्संक्षेपतः। संक्षेपतः ३
संक्षिप्य वर्णितं पुरा प्राक् भागवते शेषे शौनके विस्तरतः पुनः द्विधा हि श्रीभागवतसंप्रदायप्रवृत्तिः एकतः श्रीना
रायणाद्ब्रह्मनारदादिद्वारेण प्रवृत्ता सा विस्तरतः शेषात्सनत्कुमारसांख्यायनादिद्वारेण तदाहैतौ ये श्रीनाराय
णब्रह्मसंवादसंक्षेपतः चतुःश्लोक्या श्रीभागवतं निरूपयित्वा तदेव ब्रह्मनारदसंवादेन दशलक्षणतया किं
चिद्विस्तरेणोक्त्वा तदेव शेषोक्तमतिविस्तरेणावक्तुं तृतीयस्यारंभः तत्र तृतीये श

श्रीशुक उवाच ॥ एवमेतत्पुरा पृष्टो मै- त्रेयो भगवान्किल क्षत्त्रा वनं प्रवि-
ष्टेन त्यक्त्वा स्वगृहमृद्धिमत् । यद्वा- अयं मन्त्रकृद्वो भगवानखिलेश-
रः कौरवेन्द्रगृहं हित्वा प्रविवेशा-
त्मसात्कृतं १. नाम

थमं तत्तु मैत्रेयसंवादः चतुर्भिरध्यायैः ततोऽष्टभिः सविसर्गः संक्षेपेण ततो विसर्गप्रस्तावेन सप्तभिर्वाराहा
वतारः ततः एकेनावविसर्गसमाहारः ततः संगेन चतुर्भिः कपिलावतारः ततो नवभिः कपिलाख्यानमिति त्र
यस्त्रिंशताध्यायैः तृतीयस्कंधप्रवृत्तिः तत्र द्वितीयान्ते परिमाणं च कालस्य कालस्य लक्षणविग्रहं यथा पुरस्ता
द्व्याख्यास्यामः कल्पमथो शृणु इति प्रतिज्ञातमर्थं विस्तरेण निरूपयितुमिति ह्यसमस्तानि पुनरिति हृष्यो
श हि मनस्वेसंपद्धिः एतानि किं चानिरूपाण्येन्या गानन्दामित्याह यद्वा अयमिति गृहं वः पाण्डवानां मन्त्रकृत दौत्य
कृतो मन्त्रयं श्रीकृष्णो दुर्योधन विधानादयमिति श्रेष्ठ निर्देशः कौरवेन्द्रो दुर्योधनः तस्य गृहं हित्वाश्रुना।
हूनपर्वपरिवेशा। तत्र हेतुः आत्मसात्कृतं स्वात्मीयत्वेन गृहीतं २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

1A कृतसंगमः प्राप्तवान् २ वरीयसि श्रेष्ठे स्वल्पस्यार्थस्य दैर्घ्यस्मात् तथाप्यसौ तानभवतिमाधुवादेनमनतामनुमोदनेनक्रो
पदेहितः संवर्धितः यद्वासाधोः मैत्रेयस्यवादेनोन्नरेणसम्प्राप्तितः इत्यर्थः ४ त्यागानर्हस्यापिगृहस्यत्यागहेतुत्वेनकोऽर
व्यायसत्यानादृ यदेतौरैर्शाभिः पतेत्थोचनत्वाच सन्नेनाग्रयादित्येकादशक्रियासेवेथः यविष्टस्यकनिष्ठस्यपो
ते: स्निवेथ्यान्यनदीनाने ८ कृतदेवस्यपुथिष्ठिरस्यदेव्याः द्रौपद्याप्राप्तमनः स्नुषायाः स्वीयेरक्तेभिः स्वकुचक्रो

श्री नेव कृतवतस्तभगवतामैत्रेयेणसंगमः कदाचासहसेवादपुनदर्शनीयनः प्रभो २ नतत्स्वार्थे
दयस्यापिविदुरस्यामलात्मनः तस्मिन्न्वेयसिप्रभः साधुवादोपबृंहितः ३ श्रीसू उ व मणवा
मुषिस्वीयगृहभागपरीक्षिता प्रत्याहृतेसर्वदृविलोनाक्ष्यनामिति ५ श्रीशु उ व प
दाववायुनामस्वस्त्वान साधून्नुसत्यधर्मेणाविनष्टदृष्टिर्ज्ञानेर्यविष्ठस्यसन्तानविवेधूवैश्यपल्ला।
दाभुवनेदहाह ६ यदासभायांकुरुदेवदेव्याः केशाभिमर्शस्तत्कर्मगर्ह्यनवारयामासनृ
पः स्नुषायाः स्वास्रैर्हरन्त्याःकुचकुंकुमानि ७ द्यूतेत्वधर्मेणजितस्यसाधोःसत्या
वलंबस्यवनागतस्य नयाचतेदात्समयेनदायंतमोजुषाणोयदजातशत्रोः
८ यदाचपार्थप्रहितः सभायांजगद्गुरुर्यानिजगाद्कृष्णः नतानि
पुंसाममृतायनानिराजोरुमेनेक्षतपुण्यले

शा: ९ यदोपहूतो भवनं प्रविष्टो मन्त्राय पृष्टः किल पूर्वजेन अथाह तन्मन्त्रदृशां वरीयान् यन्मन्त्रिणो वैदुरिकं वदन्ति १० अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवागः सहानुजो यत्र वृकोदराहिः श्वसन् रुषा यत्त्वमलं बिभेषि ११

श्वसमानोविवत्वथेनहरंत्याः प्रत्यावलंबनस्यसमन्याश्रयस्यवनागमनाय्यायांरूसम।
कुसानिविप्रस्त्रीणांवानद्वर्तवेथेनहरंत्याः १ मोहंनुषगिनाः प्रदेसेवमानः विवेकवा ८ यानिवचनानि
येनएवंकृतेनदायोयाचमानस्यपत्रदानतमः मोहंनुषङ्गिणाः अवसेवमानः विवेकवा
सांभीष्मादीनाम्रमृतायनानिअमृतस्वादींनिराजाधृतराष्ट्रः दुर्योधनोवाकुरुवक्रूतमनेहतानोनष्टःपु
एयलेशोयस्यसः नमुहुकीर्तिधर्मादिर्हेतुः किंतरामपर्याप्तिमात्रहेतुः पुण्यलेशप्रवासीनस्यापि

यदानदृ नदद्येउ

२

श्री
भार
टी
२

स्वानो विदुरस्यैव कृते पराभवं दर्शयति यदश्रौषमिति षड्भिः यदश्रौषं नेनमंत्रायोपहूतो नरहंसं विशिष्टमंत्रेण्डु ड्स्तनप्रयानेनसंत
दाह किंमेविद्धि णोयापिथवेडु रिके विदुरवाक्यामानि श्रमिदं वदंति ।१। नदेवाह प्रजानतशत्रो नीतिविधि
तवागत्र्यपरार्थसहमानस्यदायंशतियज्ञुदेह्यियत्रापरार्थंतुजेः महृवर्तमानाहृकोदरहृ पादिः क्रोधेनयस
त्वतेनयद्यसमावं विभेषि ॥ समनतारश्रुतः पुत्रावहृवः सेनीतिगवें माहृयाशुत्पाह पार्थोस्तुमुकुंदः प्रास्तो
सत्यर्थो । त्र

यदोपहूतो भुवने प्रविष्टो मंत्राय यद्दृशः किंतत्पूर्वं नेन प्रयाहृनमेत्र यद्दशो वरी
यान्मंत्रं विद्धि वेडु विकिं वदंति ।१। प्रजानतशत्रोः शतियज्ञुदायेनीतित्वतोडु ।
विषहेतवागः महानुजोपनद्वृकोदराहिः ध्रुवसन्नक्षायतन्नवमलेविभेषि
॥ पार्थोस्तुदेवो भगवान्मुकुंदो गृहीतवान्सादितिदेवदेवः प्रास्तेस्व ९१
योयदुदेवदेवो विनिर्जिताशेषनरेन्द्रदेवदेवः
१२

योऽनेन गृहीतवान्स च देवस्तत्रापि भगवान्न तु प्राकृतः किंच सहादितिदेवो विशेषदेवः वंद्यादिभिर्वर्तमानः
यतोऽसौ नैव विशादेवा स्वर्गस्थाः स च स्वगुणैर्महैव वस्तु सर्वमास्तेन तन्वन्य जगतः किंतु यदुदेवानां देवः श्रेष्ठः य
तोऽसौ तेनैव यदुप्रवीराः श्रेष्ठः किं च नरदेवशु मलेस्य रेणुदेवं तिप्रकाशयते इति नरदेवदेवाः राजानः
विनिर्जिताशेषनरदेवदेवा येन यतोऽसौ तेनैव सर्वे राजानः अतः पार्थीनादायेदहोति १२ ॥ ॥ २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

2A दुर्योधनः तत्रमत्यन्तेइतिवेदतत्राह सपुत्रश्रूर्तेदोषएवयह्ण्यविष्टप्रान्तेदोषमेहेतुः पुत्रषद्विट्श्रीकस्तद्देश
कोसायंनमपत्नद्युयाप्रत्नासिनत्वपन्यस्मादितिसपत्यमाहुः गताश्रीर्यस्मात्स्वमितिआकोशतिप्रत्नपवन
कोसायंनमपत्नद्युयाप्रत्नासिनत्वपन्यस्मादितिस्पपत्यमाहुः गताश्रीर्यस्मात्स्वमितिआकोशतिप्रत्नयवत्.
मपोवमसंगत्नेप्राप्तन्यजकथयुवेस्त्यान्पइत्याह कलस्यकोशलाय न्यत्नेदेकेकल्तस्यार्थ इतिहल्यायः ।२
स्पविवानएवमुक्तवान् प्रसीदत्नाममनोसहह लीयशीत्लेयस्य सः कर्णाङ्डुः शासनयाक्तनिसहितनदुर्योध।
नेननिरस्कृतः ।७ तिरस्कारमाह कःइतिदासीसत्नोह्यत्राह्वानात्मेहे ः जिह्मस्त्रकुटिलः जिह्मनामाह य

सपुत्रदोषः पुरुषप्रवीरःसन्नेगृहान्यविष्टोयमपत्यवृद्ध्या पुत्रासिकुस्ताह्विगतः गतश्रीः त्वनाथशे।
वेकलकोशलाय ।२ अथूविवासनत्त्रमघाधनेनप्रवहकोपस्फुरदितायवेण प्रसन्नःसन्स्वह् १७
लीयशीलः दतात् सकर्णोप्युनसोवन्तेन ।७ कपतमत्रोपन्यहावजिह्मदासाः स्वनेयहलितेव
पुत्रः तस्मिन्यनीपःपरक्रान्यप्राप्तनिर्वासयतामास्पुरास्पुसान् ःसइत्यमन्यहणकर्णवाये
श्रीतः पुरोममेस्तनाडितोपि स्वयेधनुर्द्धीविनिधायमायोगतव
घोयाद्रुतमन्यमानः ।८

स्यवालेनमप्रत्नेनपुत्रः तस्मिन्नेवव्यतीतः प्रत्यकृत्तः परेषांकार्यवर्तिते यतः पुत्रान्निर्वासयामासमानः स्पस
स्यवालेनमप्रत्नेनपुत्रः तस्मिन्नेवयतीतः प्रत्यकृत्तः परेषांकार्यवर्तते अतः पुत्रान्निर्वासयामासमानःस्पस ष
त्वनीवमात्रमेवहृत्यथः पादांतरेशमयानवदमगतः ।५ अनुत्नणैः कर्णयोवणवल्यविशाङ्किः परस्पुवा
वाक्यैर्ममेस्तनाडितोपिगतव्यथः तवदेतः मायामुकवहुमन्यमानः अहोमायायामाहात्म्यमितितामे रा
वतवहेत्मन्यमानः तत्रिसाग्रणात्पुर्वेस्वयमेवायात तिल्लगाम किंकृतवापतेनूनंमविष्यतिकिं ५
धनुर्मोतितस्यहारिधनुर्निधाययत्नाभीमादिभिः संगत्याश्रिभिः यात्यतीतिमाशङ्कोदितिधनुर्नि।

श्री
भाग
टी
३

ततो निर्गत्य तीर्थाटनप्रकारमाह सप्तभिः मृगजाह्नव्यां निर्गतः सन् तीर्थपादस्य स्पर्शस्य हेतोः पदानि दे
वाग्रणि पुण्यानि विकीर्यन् यथाश्रम्नवकामन्यत्पपयत कौरवाग्रणीः पुण्यपत्तनं इति तेषां भागधेयं वने च हेपणगतानि
तिस्रविनत्र्यामसहस्रमूर्तिः वामनगदाग्रयेनेक मूर्तिः सन् तीर्थपदानि यान्यपिष्ठाय स्थितानि तानि तानि जगा
मेत्यर्थः १७ पुण्यानि यानुपवनादीनि तेषु कूजालिनादिगूढ स्थाने प्रपेकानि तोयानि येषां ते प्रसरित्स

स निर्गतः कौरवपुण्यपत्तनगाङ्गजाह्नव्या तीर्थपदः पदानि प्रत्याक्रमत् पुण्यानि विकीर्णयो नृपाश्रयि
हितो यानि सहस्रमूर्तिः १८ पुरेषु पुण्यापवनाद्रिकुञ्जेष्वपङ्कतोयेषु सरित्सरःसु अनन्तलिं
गैः समलङ्कृतेषु चचार तीर्थायतनेष्वनन्यः १९ गां पर्यटन्मेध्यविविक्तवृत्तिः सदाप्लुतो
धःशयनोऽवधूतः अलक्षितः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणानि २० इत्थं व्रजन्भारत
मेव वर्षं कालेन यावद्गतवान्प्रभासं तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः २१

रः सन् तीर्थं पुण्यप्रदानप्रसक्तानेषु वदेनेषु कौरशेषु मनेन सर्वलिङ्गैर्मूर्तिभिः समलङ्कृतेषु अनन्य
एकाकी १९ किं च गां पर्यटन व्रतानि चेरे अचरत् मेध्या पवित्रा विविक्ता असंकीर्णा वृत्तिर्जीविका
यस्य सदाप्लुतः प्रतितीर्थं स्नातः अधः शयानेऽयस्य अवधूतः असंस्कृतदेहः अवधूतवेषो वल्क
लादिधारी अलक्षितः स्वैरलक्षितः २० एकस्य चक्रमन्यस्य सामेकमेव राज्ञः विहङ्गमेतानामपत्रं यस्या
तामजितेन श्रीकृष्णेन सहायेन २१

३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

3A

तत्र प्रभासे परमस्य रेम्यस्यर्थयानिमित्तभूतया सह दोकोरवोनाविनष्टिं विनाशभस्मकृणोत परस्य रेनाशोह हष्टेजः वेणुज्जेष
द्विंसे श्रयतेय हुनेतद्यथाद्यंथभवतितायथमन्यकृ उहुमाभिमुखे २१ त्रितादीनामेकादशानीर्थानितत्राम्नाभ्यसिद्धान्या
मेवितनान २२ द्विजदेवतर्षिभिर्देवैश्च कृतानिस्राणमं गंगापतिवर्तितेरति अन्यगान्याशुभानितशुभ्रलिंचकृतेनोकि।
ताविश्वर्धमार्हमत्रेभषविद्धितानियशुतानिनानाविधानिविस्तारायतनानितेत्राणितीर्थानिवाषितेव यथावक्ष्या
कितमोहव्रतोदर्शनात २३ प्रतिव्रजत्प्रतिकम्पयावडहवः श्रामःतावदस्यमपियस्तुनाशुपेत्यसाविडरःश्राक्रन

तत्रायश्रुश्रावसुहृद्धिनष्टिं वनेयथावेणुजवद्धिसेश्रयं सेस्यहेयाहयमयाजशोवनसस्वतीप्रत्यगि
यायतल्ली २४ तस्यात्रितस्याधानसोमनोश्च ष्टयोरथाग्रवसितस्यवायोः तीर्थंसदासेस्यगंवोगुहा।
स्यथस्नाहदेवस्यसम्प्राप्तिषिवे २५ अन्यानिवेहद्विजदेवदेवैःकृतानिनानायतनानिविस्तेः धन्यगंगुणा
कितमोदिवाणियदर्शनात्कलमगुस्मरेति २६ ततस्त्वतिवज्यसुराष्ट्रमहेसोवीरमत्स्यानकुरुजांगला
श्र कालेननावसुतुनाशुपेत्यतत्रोद्धवेभागवतेददर्श २७ सवासुदेवाजुचरं प्रशांतं बृहस्पतेःप्राक्तनना
यंप्रतीतं प्रालिंग्यगाढंप्रणायेनभद्रंस्वानामपृच्छद्भगवत्प्रजानाम् २८ कश्चित्पुराणौपुरुषौस्वनाभ
पाद्मानुवृत्तेहकिलावतीर्णौ आसातउर्व्याः कुशलंविधायकृतक्षणौकुशलंशूरगेहे २९ ॥

केश्चत्कुरूणांपरमःसुहृन्नोभामःसञ्चास्तेसुखमगशौरिः योवैस्वसृणांपितृवद्ददातिवरान्वदान्योवरतर्पणेन कच्चिद्वरूथाधिपतिर्यदूनांप्रद्युम्न आस्तेसुखमंगवीरः
देवः भगवतः प्रजानां यो पोष्यमाणः ३० प्रययमेनावनरामकेसयोः कृपाल्लेशगृह्णुति कच्चिद्दितिसंस्वनाभोभवः
सूनाम्यः पाथः वालानस्यानुवृत्त्यापार्थयत्याहृदावतीर्णौ कृपालमासानेवर्तितकृतदोषादमावसरोसर्वेषाः
कृतोल्लसनाविनितवानयार्निम्यकृपालतेपिडकृविशेषणाविशिष्टोपूरसेनस्यगृहेकाश्चिदितिआसानेरतिष

श्री
भार
टी०
५

4

यदुवंशजानां श्रुतिनवमिः भामः दृष्टः शौरिर्वसुदेवः यद्वाभामो भगिनीभर्ताऽक्रूरो वसुदेवस्य भगिनीसुतो देवकी।
पालोभगिनीभर्तुलोकव्यवहारः वराननयानवदन्यः स्वस्तुहारः वरमणीतनयलीनां तत्पणेन सन्तोषणेन सह २७ वहूया
धिपतिः सेनानीः प्राद्युम्नस्य भ्रातृवंशजः निस्सरेकामं संततं प्रभिलेभे पुत्रवत्सलप्रवृत्ती २८ सात्वतादीनामधिपतिरुग्रसेनः शा
लपत्रनेत्रः श्रीकृष्णः नृपासना श्रीरामासितानां परिहृत्य पारमेयेन रक्षितमित्यर्थः २९ दृष्टो सो म्यहरेः सुतः ते
न सितपत्राणां पत्रमः स्वहृदो भामः सम्प्राप्ते पुत्रवंशे गवीर्वि: यो वैभवस्य भृत्ये पितृवद्दर्शितवान् वदान्यो वरात
पालन ३० कच्चिद्धृत्याधिपतिर्यदूनां प्रद्युम्नप्राप्तेरबवीमगवीरः ये का किं तो भगवतो भिल्लभेषु राराधिति
किष्यान्समर्थदस्यो ३१ कच्चिन्नवे सात्वतवृष्णिभोजदासार्हकाणामधिपः सम्प्राप्ते यमभ्यषिंचच्छ्रुतनय
नेनैवानृपासनाशां परिहृत्य हरात ३२ कच्चिद्धरेः सौम्यसुतः सदृक्षः प्रास्तेग्रणी रथिनां साधु साम्बः
प्रसूतवेनो रुक्मवतीसुताप्रद्यदेवं गृहेयो विकयाश्रुतोऽग्रे ३३ क्षेमं स कच्चिद्युयुधान आस्ते
यः फाल्गुनाल्लब्धधनूरहस्यः लेभेऽञ्जसाधोक्षजसेवयैव गतिं तदीयां यतिभिर्दु
रापाम् कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः यः कृष्णपा
दांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ३४ ॥
नरसत्वः सदृशः साधुसत्वसमाः स्वेच्छं हे स्वामि कार्तिकेये प्रग्रे ऽपूर्वं जन्म वियो भवान्याः गर्भे धृतवान् ३५ पृथुथानः
सात्यकिः क्षेमं ऊधास्ते सालफल्गुनात् दर्जुना लब्धधनुर्वेदरहस्य एव नदीयाम यो ऽत्रजसं बोधिनी ३६ श्वफल्कः
पुत्रोऽक्रूरः बुद्धोविद्वान् प्रपन्नो भगवंतं प्रपन्नः प्रजुस्तनयन्यकानमीवः निष्पापः भक्तो ऽस्ति मयावेष्टितनयस्तुतः
तप्रेमणा विभिन्नं विदीर्णं धैर्यं यस्य सः स्वस्तिदममास्ते ३७ ॥

4A

देवकनामायोभोजः तस्यपुत्र्यादेवक्याः विष्णुः प्रजापुत्रोयस्याः तस्यदेवमातुरदितेरिवकच्चिच्छिवंयज्ञवितानम।
र्थं त्रयीयथाप्रकाशकतयाविभर्तितथाद्दाव सात्वतानामुपासकानांकामानदोग्धिपूरयतीतिकामदुघः भग
वतेहृतः येशाब्दस्यशास्त्रस्ययोनिंकारणमाममनेति देवाः ऊतः मनोमयंमनसःप्रवर्तकंतत्त्वतः सत्वस्यान्तः
करणस्यचतुर्विधस्यतुरीयंतत्वंचतुर्थमयि देवे विज्ञाहंकारबुद्धिमनसांअन्तःकरणभेदानांक्रमेणवासु
देवसंकर्षणप्रद्युम्नानिरुद्धाअधिष्ठातारः मननमस्यपादूर्ध्वयोनिंतप्रसिद्धंमनः पूर्वंशब्दयोनिंरूपवेतितथाप्य

केचिच्छिवंदेवकभोजपुत्र्याविष्णुप्रजायाइवदेवमातः यावैस्वगर्भेणदधारदेवंत्रयीययायज्ञविता।
नमर्थं २३ अपिस्विदास्तेभगवान्सुखंवोयः सात्वतांकामदुघोनिरुद्धः यमामनन्तिस्महिशब्दयोनिं
मनोमयंसत्वतुरीयतत्वं २४ अपिस्विदन्येचनिजात्मदैवमनन्यवृत्त्यासमनुव्रताये हृदीकसत्या।
त्मजचारुदेष्णगदादयः स्वस्तिचरंतिसौम्य २५ ॥

योऽन्तरात्मामनोमयइतिश्रुतेः तस्यपञ्चैवशिरः ऋग्दक्षिणः पक्षः सामोत्तरः पक्षइत्यादिश्रुतेः तथा
वशीकृतायोग्यात्मावुद्ध्यासमन्यार्थोमनोऽस्मिके विवदतयामनः कामाधिमानाहृत्यसंप्रेरयतिमारुतं मारुतस्त
रश्चिचरन्मध्येजनयतिस्वरमित्यादि २४ अपिस्वित्किंस्विदन्येचस्वस्तिचरंतिनिजस्यदेहादिव्यतिरिक्त
स्यात्मनोदैवंश्रीकृष्णमनन्यवृत्त्याएकांतभक्तिभावेनयेसम्यगनुव्रताअनुरक्ताः हृदीकश्चसत्यभा
मायाश्चात्मजश्चचारुदेष्णः वाचारुदेष्णइतिपाठः आदिर्येषांतेपि २५ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भार. टी. ५

इदानीं कृत्स्नमेव निषिद्धिः अपि किं स्वदोर्भ्यां स्वबाहुबलबलितेनाभ्यां विजयाच्युताभ्यां अर्जुनकृष्णाभ्यां धर्मेण मार्गेण
यो युधिष्ठिरः सततं धर्ममेव यो दायविभागानि पालयन् सततमेव याचिनः धनं ददाति तस्य अर्जुनस्य भ्रातुरेवेति कथं वधं तस्य चायं इत्य
र्थः १८ कृतापचारस्य कृतापकारस्य पुरुषस्य परिभूतस्य अनन्तरं कामं वेदितव्यं तं बहुकालं भावितं तत् अतिवदन्यं मर्षी भीमः किं च
पुनर्वनेवासे गदया विविधानि विधिमार्गे चरतः २० इयत्सुपानां मध्ये यशोधाः कीर्तिधारी यत्र स्वीयानां मध्ये यो

अपि स्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति मतं दुर्योधनेन यस्य सभायां साध्वी पाञ्चाली
विनेयाऽनुभूत्वा १८ किं वा कृतापचारं च मन्युमर्षी भीमो हि विहीनं तमविमुञ्चन् यस्याङ्घ्रिपानेऽरण्ये
नैः सह मार्गे गदाया चरतो विविधे २० कविः यशोधा स्वयं सुपानां गोऽभिवधः आपद्गतो यत्र
तिलोऽत्र कृतं तदा माया किरातो गिरिशः ततोऽपि २१ यमात्मजः स्विन्नो नयो घोषयाः पार्थः सम्भ्रमे पदे
भिरतिस्तावेवमानसत्यमध्ये स्वविक्रमे परान्तपर्याणि
ववज्रिवक्त्रान् २२ ॥ ॥

विषयः अपराध्येयो यस्य शरकृतेन बाणसमूहेन गूढबाहुः १ उत सविता किं स्वित् यमोऽना
अलसहृदयोऽस्माने कीदृशमिति इत्यपेक्षः माद्र्याः सुतानां पुत्रयोः वृत्तोऽपि वा पर्णाविवरमाने किं कृतमपरा
त् दुर्योधनात् स्वविक्रमत्वीर्य राजेन्द्र इत्यादि पवन्वज्रि वज्रादिदर्शनात् स्वविक्रममनस्ततो गात्रैवै
ति यद्वापरार्णवति यदि द्वीपमध्ये श्रमतमानयतां तामिहन्ति अद्रि तीर्णोऽवनिमध्ये वा दिगन्तेऽवास ५

5A

हृष्यायाः किंतुकश्चालेहस्कुर्यंयतस्तस्याः पांडुनाविनाप्राणधारणमेवान्याश्चर्यमित्याह प्रहृष्टेति म्रियतेजीव॰
विनवाश्वत्याश्चर्यंयतोर्भकार्थेम्रियतेनभोगार्थेतस्यापिनाश्चर्यमेवेत्याह तेनतथाभूतेनविनातदेवाह यस्मि
निधनुर्वेदविद्वितीयसहायोयस्यहृष्यायाअर्भकार्थेजीवतीतिपुत्रमेवेत्याह ४० हेसौम्यतेधृतराष्ट्रजीवनमनु
शोचामि तात्किमथःपतंतंतत्रहेतुःपवेनायस्तायथाब्राह्मणस्वेनतस्पुत्रदोहेहणायाविदुरहेद्रोहेकृतवा।
नकिंवजीवतोपि भ्रातुर्मेमापकृतवानित्याह येनस्वसुद्वातामहेस्वपुर्याः सकाशान्निर्यापितः विवासितः

प्रहृष्टयापिम्रियतेर्भकार्थेराजर्षिवर्येणविनापितेन यस्त्वेकवीरोधिरथोविजिग्यध
कु नुर्द्वितीयः कुमस्त्वतस्तः ४० सौम्याद्दुशोचतमधःपततेभ्रात्रेपरतायविदुरहेयः नि
र्यापितोयेनसहृत्स्वपुर्याअहंस्वपुत्रान्समनुव्रतेन ४१ सोहंहरेर्मर्त्यविडंबनेनदृशो।
नृणांचालयतोविधातुः नान्योपलक्ष्यः पदवीप्रसादाच्चरामिपश्यन्गतविस्मयोत्र ४२

४१ अहोवत्तुविस्मयोजानतोपितस्यैवंदुरत्ययहितेत्यतः तेमाधुरपितुःस्वेच्छापितोसीत्यतस्ताह सोहंहरिः
प्रसादानतस्यपदवीमाहात्म्यपश्यनगतविस्मयः अत्रभूतलेनान्योपलक्ष्यः स्वरूपेविचरामिकथंभूत।
स्यमर्त्यविडंबनेनतथेश्वर्याच्छादनेनमानुष्यानुकरणेननृणांदृशः चित्तवृत्तीः चालयतः ४२ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री भाग टी ६

नतु हरेः किमेवं लीलया येन स्वभक्तो भवेनवामादि क्लेशा भवंति स्वस्य वै दोषस्तेन नो यमादिप्राभवः तद्धरं ते।
मोक्षपरायणेन तस्मै वहन्ते नापराधो येद्वऽस्मत्प्राह नृलेनानाश्रितं त्रिभिर्मदेकृतम्यया। नाशु हन्तानानवधाप्ष्योतः अ
यज्ञानसमानिविहीषयाऽऽशः अयरामयथवद्दत्तसमयेयपिङ्कृणामवशुपदते तदानीमेवतेषां वथेवडष्ट
राजवथानस्यादित्यायायेनेनस्यथः विद्यामथोदनमदृस्तस्वभिननोमदः प्रतेमदामदोधवानोतपवाहिस
तोऽदमाः ३२ सर्वेंडहंतवधार्यमेवभयवेवोजनकर्मणोविनान्यर्थेतिकोऽपुतिकन्यायेनाह अजस्यापिजन्म।

नृवं तृपाणां त्रिमदेदृयानोमहीसुहूः वालयनो वसुभिः वथा स्वप्न आर्निनिह्रीर्थयेशोषपेद
नावभगवान्नुरूपणा ३३ अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां नन्वत्र
यकोऽहंतिदेहयोगेपरोगुणानामुतकर्मतंत्रे ३४ तस्य प्रपञ्चाखिललोकपालमवास्थ
तानोमत्पणासनेस्व अर्थोपजातस्यपदुद्यजस्यवार्तोसवैकोर्तयतीर्थकी
र्तेः ३५ ॥ राम ॥

अकर्तुः कर्माण्यपि पुंसां ग्रहणाय कर्मसु प्रवृत्तये अन्यथानवदेवेनहिंभयवतो जन्मादिकथानावदातोके।
वात्माविगुणानां परो गुणातीतोऽदेहयोगं कर्मविल्लावंचाहंतीतीति तस्मादेवभूतानिविन्यमायाविनोद।
स्यकथेकथयेत्याह तस्य प्रपञ्चायसविललोकपालास्तेषामन्येषांवसी येन शासनेस्थितानामथो
यप्रयोजनाय पदुस्ठजातस्य तीर्थसंसारतारिणीकीर्तिर्यस्य ति ३५ ॥ ॥ ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्यमन२

6A

इति श्रीभावार्थदीपिकायां तृतीयस्कंधे प्रथमोध्यायः १ द्वितीये कृष्णविश्लेषाद्दुःखोद्धवोद्धवः तत्रैवाल्प
वयिस्यापि कृष्णस्यावर्णयत्कृविन तदेवं प्रियवार्ता पृष्ठ उद्धवस्य श्रीकृष्णविरहातिदुःखेनातिवचनासामर्थ्य
माह द्वाभ्यां इतीति स्मारितेः इत्येतेरायस्य १ एतदेवकेमुतन्यायेनप्रपंचयतिहाभ्यां यः पंचवर्षोपि बाललीं
लया कृष्णं कं विस्तारिकल्पमपरिकल्पमिते एवस्वाधनैः परिचर्यांकुर्वन् प्रातर्भोजनार्थं प्रार्थितोपि नेच्छन्नैच्छ

इति श्रीभागवते तृतीयस्कंधे प्रथमोध्यायः १ श्रीशुक उवाच इतिभागवतः पृष्टः क्षत्त्रा वार्तां प्रिया
श्रयां प्रतिवक्तुं नचोत्सेह उत्कंठास्मारितेश्वरः १ यः पंचहायनो मात्रा प्रातराशाय याचितः तन्नै
च्छद्रचयन्यस्य सपर्यां बाललीलया २ सकथं सेवया तस्य कालेन जरसं गतः पृष्टो वार्तां प्रतिब्रू
यादृर्तुः पादावनुस्मरन् ३ समुहूर्तमभूत्तूष्णीं कृष्णांघ्रिसुधया भृशं तीव्रेण भक्तियोगेन नि
मग्नः साधु निर्वृतः ४ पुलकोद्भिन्नसर्वांगो मुंचन्मीलदृशा शुचः पूर्णार्थो लक्षितस्तेन स्नेहप्र
सरसंप्लुतः ५ शनकैर्भगवल्लोकान्नृलोकं पुनरागतः विमृज्य नेत्रे विदुरं प्रत्याहोद्धव उत्स
यन् ६ ॥ ५ तस्यामेव तीव्रेण १

ते २ जरसं वृद्धत्वं गतः प्राप्तः ३ श्रीकृष्णांघ्रिसुधया सोऽनिर्वृतः विवशात्वोपादकेन भक्तियोगेन भृशं निम
ग्नः ४ पुलकैरुद्भिन्नानि उज्जृंभितानि सर्वाण्यंगानि यस्य मीलन्त्या दृशा शुचः अश्रूणि मुंचन् तेन विदुरे
ण पूर्णार्थः कृतार्थो लक्षितः यतः प्रभवति यः स्नेहप्रसरः स्नेहरसः तस्मिन्संप्लुतो निमग्नः ५ भगवल्लोके वा लो
कः तस्मात् नृलोकं देहानुसंधानं उत्स्मयन् दृष्टकुलसंहारादि भगवद्ध्यानं यस्मरणेन विस्मयप्राप्तः
वन् ६ ॥

श्री
भाग
टी
८

श्रीकृष्णविरहेणासन्नप्रमनाः प्रत्याह श्रीकृष्णद्युमणीत्यष्टभिः तस्य निम्लोचेस्तमये सति अजगरेण का
लेन महासर्पेण गीर्णेषु निगलितेषु नो गृहेषु गतश्रीषु अहं नो बंधूनां किं कुशलं ब्रूयां ७ अनुशोचन्नाह दुर्भगो भाग्यहीना
ये महद्वसंतोपि हरिं सर्वेश्वरं न विदुः नित्यसंततमयं इति न ह्यत यथा तद्वीसमुद्रे जातमुडुपं तत्र आसीनाः केव
लेकमनीयः कश्चिज्जलचरः इत्येव विदुः न तु मनसमं इति न ह्यत यद्वा जले प्रतिबिंबितं चंद्रं यथेति ८ भाग्य
हीनत्वादेव न विदुः न तु ज्ञानसामग्र्यभावादित्याह इंगितज्ञा इंगितं तस्य जानंतीति तथा पुरु प्रकृष्टत्वं प्रौढाः
निपुणाः एकस्मिन्नेव स्थाने आरमंतीति तथा एवंभूता नाम सात्वताः सर्वे सात्वतां ऋषभं सात्वतश्रेष्ठं

श्रीउद्धव उवाच कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह किं नु नः कुशलं ब्रूयां गतश्रीषु गृहेष्वहं ।७
दुर्भगो बत लोकोयं यदवो नितरामपि ये संवसंतो न विदुर्हरिं मीना इवोडुपं इंगितज्ञाः पुरुप्रौढा
एकारामाश्च सात्वताः सात्वतामृषभं सर्वे भूतावासममंसत ९ देवस्य मायया स्पृष्टा ये चान्यद
सदाश्रिताः भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ १० प्रदर्श्यातप्ततपसामवितृप्त
दृशां नृणां आदायांतरधाद्यस्तु स्वबिंबं लोकलो
चनं ॥ ॥

मन्यंत ९ येऽपादवः देवमायया स्पृष्टाः यादवोयः स्मादहं ध्रुवमिति वदंति ये च शिशुपालादयः असदेवान्यद्धे स्मा
श्रिताः निंदंति तेषां वाक्यैः आत्मनि हराबुप्तात्मनो नितांमनो वित्तस्य माहत्वा अस्य बुद्धिर्न भ्राम्यते मोहं न प्राप्यते अ
न तस्य दुःखं पवसर्थः १० कोसौ हरिरित्यपेक्षायामाह प्रदर्श्येति न तप्तं तपो यैः अतप्ततपसां अवितृप्ता दृशो येषां स्वा
बिंबं मूर्तिं यावत्कालं दर्शयित्वा योंतर्हितवान् लोकस्य लोचनमादाय छित्वा यथा ह दृशास्यानास्य विलो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

7A

नदर्शितवानित्याह त्रिभिः यन्मर्त्यलीलासु औपयिकं योग्यं स्वस्यापि विस्मयजनकं यतः सौभगर्द्धेः सौभाग्यातिशय-
स्य परं पदं पराकाष्ठा भूषणानां भूषणान्यङ्गानि यस्मिन् ॥१२॥ दृशां स्वस्त्ययनेन परमानन्दकरं त्रिभुवनस्य लोकः आशि-
मात्रम् इह अन्वि वेधसो र्वाक्सृतौ अर्वाचीनसंसारे निर्माणे मनुष्यनिर्माणे च यत्कौशलं तेन पूर्णतया कान्त्येन ग-
तमुपलब्धमित्यमन्यत परं तस्य कौशलं प्रलीनमेवमेने तत्र तर्हि विधातुः स्रष्टुः नाभावे ऽपि केनोत्कृष्टं हि यदृशका ॥१३॥
अनुरागेण प्लुतः व्याप्तः हासः रासः नर्मविनोदः लीलावलोकश्च तैः स्वकृतं हासमाद्यमेन तत्प्रतिलब्धमाना यामिस्ता॥

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतं विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषण-
भूषणाङ्गं ॥१२॥ यद्धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः कार्त्स्न्येन चाद्येह गतं विधातुर-
र्वाक्सृतौ कौशलमित्यमन्यत ॥१३॥ यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः व्रज-
स्त्रियो दृग्भिरनुप्रवृत्तधियो ऽवतस्थुः किल कृत्यशेषाः ॥ स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकं-
पितात्मा परावरेशो महदंशयुक्तो ह्यजो ऽपि जातो भगवान्यथा-

ग्निः ॥१५॥ कृत्यशेषा यासां ताः

दृग्भिः सह प्रवृत्तया दृष्ट्यागतं श्रीकृष्णमेवानुगता धियो यासां ताः असमापितेषु गृहकृत्येषु स्थानेषु अवतस्थुः स्वशान्तरूपेषु इतरैः पीड्यमानेषु अनुकं-
पितः कृपयाऽऽर्द्रीकृतः आत्मा यस्य अजो ऽपि जातः आविर्भूतः महाभूतरूपेणानित्यसिद्ध इवाग्निर्यथा काष्ठेष्वाविर्भ-
वति तद्वत् अजन्मनि हेतुः महदंशो महत्तत्त्वं कार्यलेशो यस्य तन्महदंशेन युक्तः इति ॥१५॥ ॥
॥ ऽऽपकवनस्थः ॥ एवंभूतस्य विश्वदर्शनेन प्रकारान्तरम् स्वीयान्येव शान्तान्यशान्तानि च रूपाणि ॥ १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मनुकूलो यं प्राक्प्रणामीशः पारं नेयं प्रतीनेस्तत्राह मामभ्येतन दुर्वितर्क्यं दुर्घटं चवेदयति तदेवाह वसुदेवगे
हेऽजन्मनो यच्चिद्धि इवनेप्रवृत्तकारणानंतनुर्विदः बदकसान्द्राविभावः कंसभयादिवनिलीय ब्रजेवासस्त्वप्रकाल।
एवमादिविश्वभयादिव पुरानपुराणः अवात्सीत्तत्र पलायन एतस्माद्धेतोः श्रुति तेस्मरतोममचेतः कर्मभूतं डनोति
व्यथयति तदेव दर्शयति यदा हेति हे नाथ तदेह पश्यवा पसीद तेऽप्रसादं कुरु तत्र नक्षत्रानि सूक्तिः शुश्रूषणं यस्ते

मोवदयन्येत्वद्रजस्यतत्वा विद्वेषवने यदूसूदेवगेहे यजेववासोरिभयादिवसंवं पुराणयवात्मीयदनंतवी
र्यैः १६ इत्येतानि चेतः स्मरतो ममैतयदा हृपादावभिवंदयस्यघोः तातेवके सानुकूशंकितानो प्रसीदते
ऽकृतनिष्कृतीनो १७ कोवाप्रभुष्पाब्धिसेरोजरेणाविस्मर्तुमीशो तपमानिविनिद्रेत यो विस्फुरद्भू
विटपेन भूमेर्भारं कृतांतेन तिरश्चकार १८ दृष्टा भवद्भिर्ननु राजसूयेचैद्यस्य कृष्णं द्विषतोपि सिद्धिः
यां योगिनः संस्पृहयंति सम्यक् योगेन कस्तद्विरहं सहेत तथैव चान्ये नरलोकवीरायत्राहवे कृष्ण
मुखारविंदे नेत्रैः पिबंतो नयनाभिरामं पार्थास्त्रपूताः
पदमापुरस्य २० ॥

यो नो ऽस्माकं चक्रवचनेरामाद्यभिप्रायं १७ ननु तर्हि [illegible] नीचा [illegible] एवं किंन स्यात् न वक्तव्यदामात्रमेतत्तथा
हविभिः कोवाप्रभुश्चसरोजयोरेणः तमस्य विविजिद्येत्सवृमानः विस्मर्तुमीशीत शक्नुयात विस्फुरन् भ्रूविटपः
भूलतासंपर्वकृतांतः तेन १८ नच तस्य सारं तत्साधनीयं भवद्भिरपि दृष्टत्वात् इत्याह दृष्टेति यांसिद्धिंस।
म्यग्योगेन यामन्वांछंति १९ आहवे युद्धे पार्थस्यास्त्रैः पूतानिष्पापाःसंतः २० ॥ रम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

8A

सत्या१

ततदेवं परमैश्वर्यं पियत्डगुणेनानुवर्तितं तन्तुनरसमानलन्तं तं वधयतीत्याह स्वयंतत्पवं भूतः तस्य तनेकै कार्यं तो।
स्मानिस्नाप्यतीति डतरेणान्वयः नसाम्यातिशयौ यस्य यमपेत्तानस्य साम्यमतिशयश्च नास्तीत्यर्थः तत्र दे
तवः यथा सौगुरूणाणाम थीशः स्वाराज्य लक्ष्मा परमानंदस्वरूपस्य पत्येव शाम समस्तभोगः बलिकं स्वहेतु
बाहरद्भिः समर्पयद्भिः विस्कालीनैः लोकपालैः किरीटाग्रेणाडितं स्वतं पादपीठेयस्य प्रणता किरीटसं घट्ट।

स्वयंत साम्यातिशयस्याधीशः स्वाराज्य लक्ष्मा समस्तकामः बलिंहरद्भिः विरलोकपालैः किर
रीटकोटीडितपादपीठः २१ ततस्य कैककर्यं मत्तभूतान्नाविस्लापयत्यगवडगुणेन निष्टत्रिवण
रमष्ठिधिस्प निवाधयद्देवनिधारयोति २२ प्रहावकीयंस्तनकालकूटंजिघांसयापायपदप्रसा
धी तेभगतिथात्रुविताततनोन्यकेवादया
तेशरणाव्रजेम

न्यवोधयन२

२२

२१

तथानिस्वस्वतितेनोन्यत्यतैश्चमविडवभूतान्न्भूत्पान् डग्रसेनेयकिंकरत्वंतदेवाह परमेष्ठिधिष्ठेणनास
नेनिषण्णमासीनं स्वयंतिष्ठन् हेदेव प्रवधारयतीत्यद्दितापितवान् २२ एवमनुवृत्तिः कृपयेवेतिसूच
यत्रपका विषमितस्यकृपात्नुतांदर्शयन्नाह प्रहोग्रा स्वर्यहंत्वमिच्छुयापिसनया संभूतकालकूटवि
घमपायपत् वकोश्ततना प्रमाधीडुष्टापिधात्र्याः यसंधाघाडवितनागानितेभमन्नवशामात्रेणय
तद्गतिं दत्तवान् ततोन्यकेवाब्रजेम २३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा॰ टी॰ ३

नतु भागवतानेव भगवाननुगृह्णातीति मन्ये असुरानप्यहं भागवतानेव मन्ये यतो भागवता इव ते विपक्षगवयानाभि
निवेशेन भगवन्तमपरोक्षं पश्यन्तीत्याह मन्ये इति त्र्यधीशे संरंभः क्रोधावेशः तेन मार्गेणाभिनिविष्टं चित्तं येषां तान् यत एवं संग्रा
मे तार्क्ष्यः कश्यपः तस्य पुत्रं गरुडं तस्यांसे सुनाभायुधः चक्रायुधो हरिः तमापतन्तमेव ते ता अपश्यन् तस्मा
त्तेषामपि स्वरूपं प्रत्यक्षं चैवेत्यर्थः वदन्ति च तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेदिति २४ इदानीं तस्यानर्था

मन्येऽसुरान्भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान्। ये संयुगेऽचक्षत तार्क्ष्यपुत्रमंसे सुनाभा
युधमापतन्तम् २४ वसुदेवस्य देवक्यां जातो भोजेन्द्रबंधने चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः
२५ ततो नंदव्रजमितः पित्रा कंसाद्विबिभ्यता एकादश समास्तत्र गूढार्चिः सबलोऽवसत् २६
परीतो वत्सपैर्वत्सांश्चारयन्व्याहरद्विभुः यमुनोपवने कूजद्द्विजसंकुलिताङ्घ्रिपे २७ कौमारीं दर्श
यंश्चेष्टां प्रेक्षणीयां व्रजौकसां रुदन्निव हसन्मुग्धबालसिंहावलोकनः २८ ॥

नयकार्यं वक्तुमारभ्यते त्रिभिः वसुदेवस्येति वसुदेवस्य भार्यायां जातः भोजेन्द्रः कंसः तस्य बंध
नागारे अस्याः पृथिव्याः शं सुखं चिकीर्षुः अजेन च याचितः सन् पित्रा हेतुभूतेन नंदव्रजमितः गतः स
माः संवत्सरान् गूढार्चिः गुप्ततेजाः २६ व्याहरत् प्राक्रीडत् कूजद्भिर्द्विजैः पक्षिभिः संकुलिताः व्याप्ता
अङ्घ्रिपा यस्मिन् २७ रुदन्निव हसन्निव यथायोग्यं सर्वेषामप्य[illegible]धः मुग्धो बालसिंहः सिंहः तद्व

२४ श्रीरामचंद्र ५

सगवाधिकेल्क्ष्ये प्राप्तः सन् लक्ष्म्याः शोभादिसंपदो निकेतनं सिताः गोवृषा यस्मिन् नानावर्णा गोसंघेषु गोरूर्वन्वे २
रणद्वेणुः सन्नरीरमत रमयामास ३१ व्यनुदत् जघान क्रीडनकांस्तृणादिनिर्मितान् सिंहादीन्यथा विपन्नान्मृतान् गोपा
न् गावश्च ताश्चोत्थाप्य तद्देवैस्तोयं प्रकृतिस्थितं निर्विषम् ३३ इन्द्रयज्ञभङ्गेन कृतनागवां हन्तैव गोसवः ते
न गोपराजेन नन्दं वित्तस्य चातिवकारादिदृश्यमानभंगेकवेन उरुभारस्याति समहत्स्य ३४ कोपाद्भग्नेनेगो

स एव गोधनं लक्ष्म्या निकेतं सितगोवृषम् चारयन्ननुगान्गोपान्रणद्वेणुररीरमत् ३१ प्रयुक्तान्भोज
राजेन मायिनः कामरूपिणः लीलया व्यनुदत्तांस्तान्बालः क्रीडनकानिव ३२ विपन्नान्विषपानेन निगृ
ह्य भुजगाधिपं उत्थाप्यापाययद्गावः तत्तोयं प्रकृतिस्थितम् ३३ अयाजयद्गोसवेन गोपराजं द्विजो
त्तमैः वित्तस्य चोरुभारस्य चिकीर्षन्सद्व्ययं विभुः ३४ वर्षतीन्द्रे व्रजः कोपाद्भग्नमानेतिविह्वलः गोत्र
लीलातपत्रेण त्रातो भद्रानुगृह्णता ३५ शरच्छशिकरैर्मृष्टं मानयन्रजनीमुखं गायन्कलपदं रेमे
स्त्रीणां मण्डलमण्डनः ३६ ॥ इति श्रीभागवते तृतीयस्कंधे द्वितीयोध्यायः २ श्रीउद्धव उवा
च ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया शं बलदेवसंयुतः
निपात्य तुंगाद्रिपुयूथनाथं हतं व्यकर्ष
द्व्यसुमोजसोर्व्याम् १ ॥

त्रः पर्वतेन एव लीलातपत्रेण तेन त्रेष भद्र ३५ मृष्टं उज्ज्वलं मंडयतीति तथा ३६ इति श्रीभावार्थदीपिकायां तृतीये द्वितीयः २
न तृतीये मथुरायामेव व्रजालके सर्वचरित्रं यत्कृतं तदाह कथ्यायाव कंसेनानन्दवर्णावतन् सुमित्रानव्यथयोः पित्रोः स्वसुखस्य चिकी
र्षयेत्यर्थः तुंगाद्दात्मंचेवत् रिपुयूथनाथं कंसं व्यसोर्व्यां परितो निकर्षणं पित्रोः सुखार्थं १ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
१०

10

ग्रामे वर्तं सविस्तरं षडंगादिसहितं पंचजनोदरविदारणमहारांतु समानीयेत्यर्थः २ भीष्मककन्यया रुक्मिण्या
योगानां समाहूताः कृष्ण त्वमार्ये समाहूतासि तया वेश्यारूपश्या इत्यर्थः केन साधुनेन श्रियो तस्याः सवर्णेन समा
नेन रूपेण यद्यपि तया केवलं श्रीकृष्ण एवाहूतः न सर्वे तथापि तस्यां लावण्येन तेषामागमने हेतुत्वमिति मये बहू
ता इत्युच्यते एषां मिषतां मूर्ध्नि दंदधत् तया सह गांधर्ववृत्या परस्परसमयरूपया बुभूषया भवितुमिच्छया

सांदीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरं तस्मै प्रदाद्वरं पुत्रं मृतं पंचजनो
दरात् २ समाहूता भीष्मककन्यया ये श्रियः सवर्णेन बुभूषयैषां
गांधर्ववृत्या मिषतां स्वभागं जह्रे पदं मू
र्ध्नि दधत्सुपर्णः ३ ॥
॥

जहार कथंभूतां स्वभागं त्वदंशत्वात्तया आत्मनोर्पितत्वाच्च सुपर्णः सपतनः यद्वा सुपर्णो गरुडः स्वभागं सुधामि
त्यर्थः यद्वा श्रिया रुक्मिण्या समानेन वर्णेन ह्ययेन वाचकेयस्य सः श्रियः सवर्णेन रुक्मीनेन समाहूताः शिशुपालादयः
किमर्थं भीष्मककन्यया सह तेषां बुभूषया भूतिर्भवनमित्येतदर्थं तत्र शिशुपालस्याह्वानं वरत्वेन बुभूषया
न राक्षसधादीनां तद्विवाहोऽस्तु वैशेषिकैव वत् ३ ॥ ॥ राम राम राम १०

10 A

कृकुं अतो वृषभान् अविद्धनासिकान् विद्धनासिकान् कृत्वेति चैनैर्वृषभैस्तद्दमनेन च भर्तृभा-
र्यो येषां तत्र स्थापितान् गृहीतः कामयमानान् अतएवाज्ञान् पराक्रमतो राज्ञः तद्धुं सैरवतन एव जयात् ४ यदाश्वश्विमाः
कुंडलेनाटेकहृदये दातुं स्वर्गगतः तदा अथ पुरुषस्त्वं तेषापि ग्रामः स्त्रीपुवतं वरवप्रियायाः सत्यभामायाः प्रियं विधातुमिच्छुः
पुनः पारिजातमानीतवान् यद्यैयथा अमितं हंसं वज्रीस्त्रीभ्रविनाये युद्धमन्वधावत् स्वकार्यसाधकेन तेन गुडोय

कश्यपिना विद्धनासादमितास्वयंवरेनाग्रजितीम्नवाह तदग्रमानानमिरएयतोज्ञानजेन्द्रवेतनः
ग्राम्भभृतः स्वशश्चैः ७ प्रियंप्रगुणोम्यस्वप्रियायाविधिन्नकराः पुनस्तस्यदर्थं वत्सामयथावस्तगणेणा
दुःखोपथः कौशमस्गान्नुनमर्यंवधूला ५ सतेमच्छेविवबुधाग्रसेनतहरुमन्नाभोन्मथितेथविद्या ग्रा
मयुतस्तननयाभ्यशोधं दत्तानेदत्तः पुरस्माविवेश ६ तथाहूतास्तानवंदेवकल्पाः ऊजेनहरुहोदक्ष्मा
नेवेषुं डन्यायसयोनगृहः सहर्षवीरानुराग सहितावलोके ७ ग्रामांतमुहूर्ते यथकास्मिन्नानागारशुषा
षितो सविधिं गृह्हेपाणीनंत्रहृपः स्वसमाध्यया
८ ॥

मस्तस्यापुत्रकएवकस्याह कौशमृगरेवनितिश्रयंवत्री ५ सनाभेनवक्रेणाकृन्माथितेहृतंमुतंभौमेर्हरुनस्यमा
ताधनियाभूम्याग्रामंचितः प्रार्थितः सन् तस्यतनयायभगदत्तोपहृतशोषंराज्यंदत्वा ६ तत्रांतःपुरे स्त्रनेयाश्वा कु
हृतास्ताः सहर्षसुश्रीराजावानुरागसहितैः प्रहितैः पोषितानेपथवस्ता कान्तिजेगृह स्वीकृतवन्तः ७ ग्रामांशयाषिता
पाणीस्तदत्तहृपः सन् सविधिविवाहोचितमवारसद्वितेयथाभवति ८ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग॰ टी॰ ॥

ॐ

सर्वतः सर्वैर्गुणैः स्वतुल्यानि प्रकृतेर्मायाया विविधं भवनं विस्तारः तद्विष्णुयायज्ञाप्रकृतेर्हेतोः विविधं भवितुमिच्छु
या ॥ ३४ ॥ कालः कालयवनः कृत्यतः आत्मैवतः मुचुकुन्दभीमादिभिः निमित्तमात्रैः स्वयमेवाजीवनत्याजितवान्
तेषां तेन स्वपुंसो तेजः प्रभावं कीर्तिवादितवान् ॥ शाल्वं द्विविधवल्कलानन्यानपि का॰श्रित्य युक्ताभिमादिभिः या
तयन्निति सपादः दन्तवक्रादीन् स्वयमवधीत् अन्यान् घातयदित्यर्थः ॥ कथंभूतानक्रूरदेवमापततो॥

तास्वपत्यान्यजनयदात्मतुल्यानि सर्वतः एकैकस्यां दश दश प्रकृतेर्विबुभूषया ॥ ३४ ॥ कालमागधशाल्वा
दीनन्नीकैः कृत्यतः पुरं अजीघनत्स्वयं दिव्यं स्वपुंसां तेज आदिशत् ॥ शाल्वं द्विविधवाणजुरं वल्कलमे।
वच अन्यांश्च दन्तवक्रादीनवधीत्कांश्च न घातयत् ॥ अथ ते भ्रातृपुत्राणां पक्षयोः पतितान्नृपान् चचा
लभूः कुरुदेवे येषां मापतितां बलैः ॥ ३५ ॥ सकर्णदुःशासनसौबलानां कुमंत्रपाकेन हता श्रिया युषं
दीधनं सानुचरं शयानं भग्नोरुमुर्व्यां न ननंद पश्यन् ॥ किया न्भुवायं दत पितारु भारो यद्द्रोणभीष्मार्जुनक॥
भीमम्लैः अष्टादशाक्षौहिणिकोमदंशैरास्ते बलं दुर्विषहं यदूनां ॥ ३६ ॥

गच्छतां येषां बलैः सेनाभिर्भूः सर्वापि चचाल ॥ ३५ ॥ सकृत्स्नैः हता श्रीरायुश्च यस्य भग्ना ऊरू यस्य तं दुर्योधनं शयानं पश्यन्
चतुर्भिस्तैर्नन्दतोषनश्चाप ॥ ३६ ॥ अनभिनंदनप्रकारमेवाह किया निति द्रोणादिभिर्मूलैः कारणभूतैः यदिति यः
अष्टादशाक्षौहिणीयुक्तः भूरस्य तमार्षं त पितरु भारो यं कियान् अल्पत्वं रूप्यर्थः यस्मात् मदंशैः प्रद्युम्ना
दिभिर्हेतुभूतैर्दुर्विषहं बलमास्ते ॥ ३६ ॥ ॥

॥

नचात्रानदुपायः प्रभवतिकिंतमधुनायप्रामदः सर्वतोमदः तेनानाप्रविलोचनानामेषांविवादोयदाभवेत्ति न
दाश्यानैवपंचयोपायः प्रनोत्यानामितकान्मानोपमप्रयेनसतिस्वयमेवविवादेनानर्दधीवनित्यर्थः १५ व
वंसमोकहृदयेनोनंक्रमेणसंविंत्यस्वराज्यस्यापायिना १६ धृतः रक्षितः १७ मत्रुनेमह १८ सात्येमह्रुतिवुख

मित्रोपयैद्यांभविनाविवादोमधामदानाप्रविलोचनानां नैषांवधोपाय इयानवोन्यामसुधेनेनर्दधने
स्वयंसम १५ एवंसंविंत्यभगवान्स्वराज्यस्याप्यधर्मजे नेदयामासस्वहृदः साधूनोवर्त्मदर्शयन् १६
उत्तरायांधृतः पूरोर्वंशः साध्वभिमन्युना सवैद्रौण्यस्त्रसंछिन्नः पुनर्भगवताधृतः १७ अयाज
यद्धर्मसुतनमश्वमेधैस्त्रिभिर्विभुः सोपिक्ष्मामनुजैरक्षन्रेमेकृष्णमनुव्रतः १८ भगवानपिविश्वा
त्मालोकवेदपथानुगः कामान्सिषेवेद्वारवत्यामसक्तः सांख्यमास्थितः १९ स्निग्धस्मितावा
लोकेनवाचापीयूषकल्पया चरित्रेणानवद्येनश्रीनिकेतेनचात्मना २० इमंलोकममुंचैवरमयन्
सुतरांयदून रेमेक्षणदयादत्तक्षणस्त्रीक्षणसौहृदः २१ तस्यैवंरममाणस्यसंवत्सरगणान्बहू
न् गृहमेधेषुविरागः समजायत २२

विवेकं २१ स्निग्धेति स्मितसहितोवलोकः तेनपीयूषकल्पयासुधातुल्ययावाचा तेनश्रेष्ठयात्रवाहहृप
यामुत्रात्मदेहेन २० क्षणदयारात्र्यादत्तक्षणेनवसरः दत्तउत्सवोवायाभिस्ताःस्त्रीणांतासुक्षणेसौहृदयस्यसः गृहमे
धेषुगृहस्थधर्मेषु योगेषु कामभोगोपायेषुविरागः उदासीन्यंजातमित्यर्थः २२ ॥

12

श्री भाग टी १२

यदास्वाधीनेष्वपि भगवतो वियोगः तदा दैवाधीनेषु को विस्रंभ इति विषादं संप्रीति विवाकः कुर्यात् योगेन चेयामेश्वरं।
श्रीकृष्णं प्रत्युव्रतः २३ शेपुः शापं ददुः भगवतो मतः अभिप्रायः तत्र कोविदाः २४ २५ वयः शील्यादि बहुगुणोपेताः गा
वः ताः २६ कन्याश्च वृत्तिकरीं नीविकापर्याप्तां २७ भगवदर्पणं यथा भवति गो विप्रार्थी असवो येषां २८ ३०

दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् को विस्रंभेत योगेन योगेश्वरमनुव्रतः २३ पुर्यां कदा
चित्क्रीडद्भिर्यदुभोजकुमारकैः कोपिता मुनयः शेपुर्भगवन्मतकोविदाः २४ ततः कतिपयै
र्मासैर्वृष्णिभोजान्धकादयः ययुः प्रभासं संहृष्टा रथैर्देवविमोहिताः २५ तत्र स्नात्वा पितॄन्देवान्
ऋषींश्चैव तदंभसा तर्पयित्वाथ विप्रेभ्यो गावो बहुगुणा ददुः २६ हिरण्यं रजतं शय्यां वासांस्यजि
नकंबलान् यानं रथानिभान्कन्या धरां वृत्तिकरीमपि २७ अन्नं चोरुरसं तेभ्यो दत्वा भगवदर्प
णं गोविप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्द्धभिः २८ इति श्रीभागवते तृतीयस्कंधे तृतीयोध्यायः श्रीउ
द्धव उवाच ॥ अथ ते तदनुज्ञाताः भुक्त्वा पीत्वा च वारुणीं तया विभ्रंशितज्ञाना दुरुक्तैर्मर्म पस्पृशुः।

इति श्रीभावार्थदीपिकायां तृतीयस्कंधे तृतीयोध्यायः ३ चतुर्थे बंधुनिधनं श्रुत्वा मत्तानन्तरं उद्धवसोऽपि।
देशेन तत्ता मैत्रेयमागमत् तेभ्रान्ता गौरवज्ञाताः वारुणीं पैष्टीं मदिराम् १ ॥ ॥

१२

12A

वारूप्यवमैत्रेयं तस्य दोषेणानिसृष्टोवनितिग्मस्तेगसु निसति मर्दनेकरनं २ उपसृज्य उपसमस्वनयोमावस्य प्रहृष्टेवाकः
पूर्वेमसद्धारकाया ४ तदभिप्रेतं गतसंहारादिकं ५ कृतेकेतक्रतावासंयकेतनमनाश्रये ६ विरलेविरसेजवि
हितेतस्मिन्नेनकौशेकौशेयकौशाम्बरणापीताबरागप्रथिश्रित उपविस्यापायिनाश्रपाश्रितः हृष्टोहृष्टधः

तेषांमैत्रेयस्य दोषेणाविषमेकृतं वेतसं निसृष्टोवनितिरवावासीद्देहएतनामिवमर्दने भगवान् स्वात्मना।
याययागतिमिमवलोकास: सरस्वतीमपस्पृश्य उपवृतमन्तगुपाविशत् प्रहर्षेणाकः भगवता उपप्रा
तिहवताव वृदंतीनश्रयाहीतिसकृतेममजिहोणुना ४ अयापितदभिप्रेतेनानन्ताहमविदम् हृष्टः
तोऽनुगमसेभक्तः पादविषेणत्मनः ५ प्रश्राश्रमेकमासीनेविविक्तवदृयितेपर्ति श्रीनिकेतसस्व
नोकृन्तकेतनमकेतने ६ श्यामावदाते विरजेप्रशान्तारुणलोचने दोर्भिश्चतुर्भिर्विदिते पीतकौशा
म्बरेणच ७ वामऊरावधिश्रित्य दक्षिणाङ्घ्रिसरोरुहम् अपाश्रितार्भकाश्वत्थमकृशंत्यक्तपिप्पले ८
तस्मिन्महाभागवतो द्वैपायनसुहृत्सखा लोकाननुचरन्सिद्ध आससादयदृ
च्छया ९ तस्यानुरक्तस्य मुनेर्मुकुन्दः प्रमोदभावानत
कंधरस्य आशृण्वतो मामनुरागहाससमीक्ष
या विश्रमयन्नुवाच १०

प्रभर्कोबालः कोमलो यस्याश्वत्थेन तं तस्मिन् पिप्पलं विषयसुखं येन तथाप्यकृशमानंदपूर्णम् ८ द्वैपायनः स
हृत्सखाबादयस्यस: स्वगुरुरुद्भवन्तास्यराधावाशिष्यामैत्रेयः इत्यर्थः प्रमोदेन भावेन च नतता कंधराय स्य पाठेन
प्रेमानुरागेन हासो यस्यां तया समीक्षया विश्रमयन् विगतश्रममकुर्वन् १० ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तेमनसेप्सितंप्रवेशमंतः स्पष्टोवेदवेदेद्विदानेहृतः विश्वसृजांवसूनांचमिलितानांसत्रेहेवसोइतिपुरापूर्वजन्मनित्वं
वसुरभूः तदामत्सिद्धिकामेनत्वयाग्रहमिष्टः प्रतस्तस्माधनंददामिदास्यामिप्रसन्नोमेत्यत्रान्मवेउदाप ॥११॥ तस्या
भाग्यमभिनंदति सएषभवोजन्मेतेभवानांमध्येचरमः यत्र यस्मिन्मदनुग्रहः आसादितोलब्धः यत्पुनर्मांइहैको
तेविषदानुवृत्यापक्रांतभक्त्यादृष्टवान्दृष्टवानसियत्तदस्याभद्रंजातमित्यर्थः नरलोकान्नृशब्देनजीवाः तेषांलो
कानउत्सृजंतंवैकुंठंगच्छंतमित्यर्थः ॥१२॥ ददामीतियदुक्तंपरंतदेवनिर्दिशति पुराइत्येवासमिनेपाद्मेकल्पेआ

श्रीभगवानुवाच ॥ वेदाहमंतर्मनसीप्सितंतेददामियत्तदुरापमन्यैः सत्रेपुराविश्वसृजांवसूनांमत्सिद्धिका
मेनवसोत्वयेष्टः ॥११॥ सएषसाधोचरमोभवानामासादितस्तेमदनुग्रहोयत यन्मांनृलोकानरहउत्सृ
जंतं दिष्ट्यादृदृश्वान्विशदानुवृत्त्या ॥१२॥ पुरामयाप्रोक्तमजायनाभ्येपद्मेनिषण्णायममादिसर्गे ज्ञा
नंपरंमन्महिमावभासंयत्सूरयोभागवतंवदंति ॥१३॥ इत्यादृतोक्तःपरमस्यपुंसःप्रतीक्षणानुग्रहभा
जनोहं स्नेहोत्थरोमास्खलिताक्षरस्तंमुंचन्शुचःप्रांजलिराबभाषे ॥१४॥ कोन्वीशतेपादसरोजभाजां
सुदुर्लभोर्थेषुचतुर्ष्वपीह तथापिनाहंप्रवृणोमिभूमनभवत्पदांभोजनिषेवणोत्सुकः ॥१५॥

दिसर्गेपाद्मकल्पेममममहिमालीलाप्रवभास्यतेयेनतत ॥१३॥ इत्येवमाहतस्यासावुक्तस्याहंप्रतिक्षणंकृपा
वलोकएवअनुग्रहः तस्यभाजनःपात्रभूतः पादांतरेप्रतिक्षणमनुग्रहस्यपात्रमितिशुचः अश्रूणिमुंचनस्ना
वभाषेउक्तवानस्मि ॥१४॥ नहिस्वात्मानंनिर्वृतिमात्रकामोहंकिंतुतन्निषेवणोत्सुक इत्यर्थः त्वयिवाग्वर्तमाना
चत्वारोर्थाःममसाधोभवतिप्रनस्त्वत्तस्तत्त्वज्ञानंदेहिइतिप्रार्थयितुमाह कोन्वितिचतुर्षुधर्मादिषुन
ष्वापितानहंनप्रवृणोमि ॥१५॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

13A

श्चटमानाचरणोद्द्रर्शयाति कर्मणोप्रनीहस्यनिष्क्रियस्यनिस्पृहस्यकाश्रभवस्यश्रनन्तमनोभवोनन्तकाला।
मनः तत्राभयादुर्गाश्रयः पलायनेवत्वात्मनोनरतिर्यस्यतस्यवह्नीभिः स्त्रीभिः सहस्त्राश्रयशंनिन्नीगृहस्याश्र।
मशनियत्न रहासिनिविषयेविदुषामपिधीःसंशयेनाविशति १८ किंचमंत्रेषुप्रसत्तेषुसत्स्वमामाह्वयश्रहोश
हेश्रहकुः श्रक्रास्थितः कालादिनाप्रावेटःसंतनः सदात्मासंयमादिसाहितोबोधोवियाणक्रियस्यनुग्यइवा
नवत श्रममतःप्रवर्हितःसन १० स्वात्मनः नवरहः रहस्यतत्वेनस्वयंप्रकाशकेकस्मैब्रह्मणेमवेनामनमाधं

कर्मीण्यनीहस्यभवोभवस्यदुर्गाश्रयोथारिभयात्पलायनं कान्तामनोयन्त्रमदायुताश्रयः स्वात्म।
नरतेः विद्यनिधीर्विदामिह १६ मंत्रेषुमोवाउपह्वयथत्वमकुंठिनावंदसदात्मबोधः हवुः प्र।
भोम्युगयइवाप्रमत्तः तत्रोमनोमेद्रवयतीवदेव १७ ज्ञानंपरस्वात्मरहः प्रकाशंप्रोवाचकस्मैभग।
वानसमग्रं प्रपित्सवेनोग्रहणीयमप्तैवेदानसमायहृदिनेनतेम इत्यावेदितहार्दस्यमत्येसभगवान्य
रः प्रारिदशावविदात्त्वआत्मनःपरमांस्थितिं १८ सएवमाराधितपादतीर्थादधीततत्वात्मविवो
धमार्गः प्रणम्यपादौपरिकृत्यदेवमिहागतोहं विरहातुरात्मा १९ सोहंतदर्शनाह्लादवियोगार
तियुतःप्रभोः गमिष्येदयितंतस्यवदर्याश्रममंडलं २१ ॥

नः प्रमात्मनोग्रहणाथापितमेयदियोम्यंतर्हिवदभर्तः स्वामिनूयमनःसंसारदुःखमनायासेनतरिष्यामः १८
श्रावेदितोहार्दोहृदिस्थ्याभिप्रायोयेनतस्मै १९ प्रभाधितपादोभगवान्तप्रवतीर्थगुरुः तस्मादधीतश्रधि
गतः तत्वात्मविबोधस्यपरमार्थोयज्ञानस्यमार्गोयेनदेवंपरिक्रम्यप्रदक्षिणीकृत्य २० तस्यदर्शनेनाह्ला
दः वियोगेनार्तिश्चताभ्यांयुतःबदर्याश्रमंस्थानंगमिष्यामि २१ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ३

14

मृदुपरोपद्रवशून्यं तीव्रं दुःसहं दीर्घमाकल्पान्तं तेपाते तपश्चेरतुरित्यर्थः लोकभावनौ लोकानुग्रहकारकौ २२ ना
नानेन विवेकेन २३ विस्रंभात् विश्वासात् २४ यद्यस्मात्स्वभृत्यप्रयोजनसाधकाः संतः चरंति नहि तेषां कृतार्थानां
मन्यत्कृत्यमस्तीत्यर्थः २५ तत्वायसंराध्य इति प्रश्रयभावः भगवतैव स्मरणमात्रेण त्वन्न नवमुपदिष्टप्रायं केवल
मसंभावादिनिवृत्तये ज्ञानी कश्चिदाराध्यः स च तत्र वाराधी मैत्रेयो न त्वहं ममातिकपवत्तदुपदेशो च स्यादिष्टत्वादिति २९

यत्र नारायणो देवो नरश्च भगवानृषिः मृदु तीव्रं तपो दीर्घं तेपाते लोकभावनौ २२ ॥श्रीशुकः॥ इत्युद्धवादुपा
कर्ण्य सुहृदां दुःसहं वधं ज्ञानेनाशमयत्क्षत्ता शोकमुत्पतितं बुधः २३ स तं महाभागवतं व्रजंतं कौरव
५ र्षभः विस्रंभादभ्यधत्तेदं मुख्यं कृष्णपरिग्रहे २४ विदुर उ० ज्ञानं परं स्वात्मरहःप्रकाशं यदाह योगेश्व
र ईश्वरस्ते वक्तुं भवान्नोऽर्हति यद्धि विष्णोर्भृत्याः स्वभृत्यार्थकृतश्चरंति २५ ॥उद्धव उवाच॥ ननु ते तत्त्वसं
राध्य ऋषिः कौषारवोऽन्तिमे साक्षाद्भगवतादिष्टो मर्त्यलोकं जिहासता २६ श्रीशुक उवाच इति सह वि
दुरेण विश्वमूर्तेर्गुणकथया सुधया प्लावितोरुतापः क्षणमिव पुलिने यमस्वसुस्तां समुषित औपग
विर्निशां ततोऽगात् २७ ॥श्रीराजोवाच॥ निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः स
तु कथमवशिष्ट उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः २८ श्रीशुकः ब्रह्मशापापदेशेन काले
नामोघवांछितः संहृत्य स्वकुलं नूनं त्यक्ष्यन्देहम
चिंतयत् २९ ॥

प्लावितोपनीतः उरुस्तापो यस्य यमस्वसुर्यमुनायाः पुलिने तीरे तां निशां क्षणमिव समुषितः औपगविरुद्धवः
कः २८ ब्रह्मशापेन निधनं प्राप्नुयत् यस्मात्त्र्याणां ब्रह्मादीनां ईशो हरिरपि आकृतिं मनुष्याकारं त्यक्तवान्
२९ ब्रह्मशापस्यापदेशो मिषं यस्य तेन कालेन स्वशक्तिरूपेणामोघं वांछितं यस्य न तत्र शापः स्वयं किं तु भ

६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

14A

मय्युपरते मतिज्ञानमर्हतीति ज्ञानस्य योग्यो भवति ३० मत्तः सकाशादीषदपि न्यूनो न भवति यद्यस्मात् गुणैर्न्नार्दितोऽभिता
मद्वयुनं ज्ञानं लोकस्यापूरयितुं ३१ एवमनेनाभिप्रायेण शब्दयोनिना ब्रह्मकर्त्ताईशे सृजयामास ३२ पशूनां त्व
नाविक्लवात्मनामधीराणां विज्ञानां ३४ मनसेक्षितं चिन्तितं ३५ कालिन्द्याः सकाशात् सिद्ध एव विदुरः कतिपयैर्दि
नैः स्वःसरितं गंगां प्रापद्यत प्राप ३६ इति श्रीभावार्थे तृतीयस्कन्धे चतुर्थोऽध्यायः ४ पंचमे भगवल्लीलाद

अस्माल्लोकादुपरते मयि ज्ञानं मदाश्रयं अर्हत्युद्धव एवाद्धा संप्रत्यात्मवतां वरः ३० नोद्धवोऽण्वपि मन्न्यू
नो यद्गुणैर्नार्दितः प्रभुः अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठतु ३१ एवं त्रिलोकगुरुणा संदिष्टः श
ब्दयोनिना बदर्याश्रममासाद्य हरिमीजे समाधिना ३२ विदुरोऽप्युद्धवाच्छ्रुत्वा कृष्णस्य परमात्मनः
क्रीडयोपात्तदेहस्य कर्माणि श्लाघितानि च ३३ देहन्यासं च तस्यैवं धीराणां धैर्यवर्द्धनं अन्येषां दु
ष्करं वैव पशूनां विक्लवात्मनां ३४ आत्मानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितं ध्यायन् गते भागवते
रुरोद प्रेमविह्वलः ३५ कालिन्द्याः कतिभिः सिद्ध अहोभिर्भरतर्षभ प्रापद्यत स्वःसरितं यत्र मित्रा
सुतो मुनिः ३६ इति श्रीभागवते तृतीयस्कन्धे चतुर्थोऽध्यायः ४ श्रीशुक उवाच द्वारि द्युनद्या ऋ
षभः कुरूणां मैत्रेयमासीनमगाधबोधं क्षत्तोपसृत्याच्युतभावशुद्धः पप्रच्छ सौशील्यगुणाभितृ
प्तः १ ॥

आरेभे महामुनिः प्रोवाच महदादीनां सर्गं तेषु हरेः स्तुतिं उक्तः चतुर्भिरध्यायैः तत्र मैत्रेयसंगमः
संवादस्तु तयोः स्कन्धे यद्द्वयेनाथ निगद्यते द्युनद्या गंगाया द्वारि हरिद्वारे आसीनं तत्र कर्मक्षयं तत्र हेतुरगाधो
परिच्छिन्नो बोधो यस्य तं मैत्रेयस्य सौशील्यमार्दवादिगुणाश्च करुणादयः तैरभितृप्तः पाठान्तरे अभितृ
प्रसन्नः पृष्टमैत्रेयं १ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रश्नानेवाह तैः कर्मभिः सुखं चान्यदुपारमं दुःखस्योपशमं चेत्यर्थः अथवा अन्यद्दुःखहानं विंदेत किं तदित्यपेक्षायामाह सेवते
दैवात् उपारमं चेति नितरां तैः कर्मभिः पुनः पुनर्दुःखमेव विंदेत अत एवंविधे संसारे नो मा कथय युक्तं कर्तव्यमपेतत्त्वं
ज्ञो भगवान्वेदितु निरूपयन्तु २ दैवात्प्राचीनानां कर्मणां निमित्तभूतात् तस्माद्धि गुणस्यातोऽधर्मशीलस्यातः सुदुः
खितस्य जनस्यानुग्रहाय भव्यानि मंगलानि भवंतः परोपकारस्वभावा एवेत्यर्थः ३ तत्तस्मान् हे साधुवर्य संसारवे।
हृपेनः प्रादिश कथय येन त्वमेनां संराधितो हृदि स्थितः सन् तत्त्वाधिगममात्मानः परो देहात्तत्त्वं हि ते पुराणं च अनादि

विदुरः उ सुखाय कर्माणि करोति लोको न तैः सुखं वान्यदुपारमं वा विंदेत भूयस्तत एव दुःखं यदत्र युक्तं भग
वान्वदेन्नः १ जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य अनुग्रहायेह चरंति नूनं भूतानि
भव्यानि जनार्दनस्य २ तत्साधुवर्यादिश वर्त्म शं नः संराधितो भगवान्येन पुंसां हृदि स्थितो यच्छति
भक्तिपूते ज्ञानं सतत्त्वाधिगमं पुराणं ३ करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्यधीशः य
थाससर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ४ यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां स निवृ
त्तवृत्तिः योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथासीत् ५ क्रीड
न्विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतार
भेदैः ६ ॥

वेदस्य माणिक्यं ४ करोति कर्माणीत्यादिना वर्णयति पंचमश्लोके क्रियासंबंधः यथा येन क्रमेण गुणरूपेण।
कृतावतारः सन् त्रिगुणमायानियंता अतः स्वतंत्र एव यानि कर्माणि करोति ५ कर्माण्येव विशेषयन् इदं सृजति
यथेत्यादिना निरीहा निष्क्रियो निःस्पृहो वा संस्थाप्य स्थितिं कृत्वा वृत्तिं जीविकां ५ स्वीये स्वे हृदाकाशे
शेते निवेश्य स्थाप्य निवृत्तानि वृत्तानि यस्य गुहायां माया यया बहुधा अनेकादिरूपेण ६ मत्स्यावतारभेदैः क्रीड

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पुनर्विशेषं पृष्टुमौत्सुक्यमाविष्करोति सुश्लोकाः पुण्यकीर्तयः तेषां मौलिर्विवाधिकेन विराजमानः तस्य मर्थः
लोकानामाधिपतिः स्वलोकोल्लोकपर्यन्तान् इदर्हिर्गलान् स्ववीर्यरूपं कल्पयामास तत्रेषु सर्वाणि यानि सत्व।
निकायस्तेषां भेदः तत्तत्कर्माधिकारी ग्राहितश्च निवा ८ अतापि च येन प्रकारेणमानां जीवानामात्मा स्व
भावः तत्कृतं कर्मतत्कृतं तद्रूपं तत्कृतानां भिधाः तासां भेदं कृतवान् विश्वसृष्टा स्वयमात्मयोनिः स्वतः सि

मनोजवत्वमपि त्वयैव नोनः स्वश्लोकमौलेस्त्वविताम्रतानि येस्तत्र भेदैर्ध्रुवलोक
नाम्नोल्लोकानलोकान्स्ह लोकपालान् ८ स्ववीर्यमध्ययत्राहि सर्वसत्वानिकायमे
दोधिकृतः प्रतीतः येनप्रनानामुत आत्मकर्मरूपाभिधानां च भिधां विधत्ते नारा
यणोविश्वसृगात्मयोनिरेतन्नो वर्णाय विमवर्य ९ परावरेषां भगवन्व्रतानि
श्रुतानि मेव्यासमुखादभीक्ष्णं अतृप्नुमत्तं तु ल्लब्धावहानां तेषामृते कृष्ण कथा
मृतौघात् कस्तत्सुधातीर्थपदाभिधानात्स्तत्रेषु वः स्व विभिरीग्मानात् यः कर्ण
नाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति १०

हृः ९ ननु महाभारते व्यासेन सर्वं कृतमेव तत्राह परेषां वर्णिकाः स्थावरशूद्रादयः तेषां व्रतानि धर्माः
मेमयाप्यभीक्ष्णं पुनः पुनः तेषां श्रवणेनातृप्नुमः तत्रास्मतेषां न तुष्ठुरवावहत्वात् यू कृष्ण कथाः
मृतकथामृतौघः प्रवाहः तस्मात् तेन तत्र वर्तं बुद्धिर्नास्तीत्यर्थः १० तत्र हेतुः कस्तत्तीर्थपदः कृष्ण
स्यासभिधानात्कथामृतत्वात् मत्रेषु समास्तेषु स्तविभिर्नारदादिभिः ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
३५

महाभारतस्याप्येवंतात्पर्यमित्याह मुनिः श्रीकृष्णो वेदव्यासः भगवद्गुणान्मोक्षधर्मोक्तनारायणीयाख्यानेन वक्तु
मिच्छुः सन्धर्मार्थकामादिवर्णनेनच्छद्महरिकथायां तन्मतिप्रवेशार्थमेवेत्याह यस्मिन्निति नृणांमतिः ग्राम्यसुखानुवा
दैः द्वारभूतैः गृहीतासती हरेः कथायांगृहीता नन्वीता तदुक्तमितिहाससमस्त्रुच्चेकामिनोवर्णयन्कामात्सोभंलब्ध्वा
सर्वाणियननरः किंफलमामानिक्षेपंधामिवपातयन लोकविताववताराथंवर्णयित्वाऽत्रतेननतो इतिहासैः पवि
त्रार्थः पुनरत्रैवनिर्दिनोग्रन्थयाज्ञोऽस्संसारबंधहेतूञ्जनस्यनोवर्णयेत्सकथंविद्वान्महाकारुणिको मुनि॥

मुनिर्विवक्षुर्भगवद्गुणानां सखापिते भारतमाह कृष्णः यस्मिन्नृणां ग्राम्यसुखानुवादैर्म
तिर्गृहीतानुहरेः कथायां ॥ १२ ॥ सा श्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसः हरेः
पदानुस्मृतिनिर्वृतस्य समस्तदुःखात्ययमाशुधत्ते ॥ १३ ॥ तान्शोच्यशोच्यानविदोनुशोचे
हरेः कथायां विमुखानघेन क्षिणोतिदेवोनिमिषस्तुयेषामायुर्वृथावादगतिस्मृ
तीनां ॥ १४ ॥ तदस्यकौषारवशर्मदातुः हरेःकथामेवकथासुसारं उद्धृत्यपुष्पेभ्यइवार्तबंधो
शिवायनः कीर्तयतीर्थकीर्तेः ॥ १५ ॥

रतिरिति ॥ १२ ॥ हरिकथायांमतिप्रवेशस्यफलमाह साकथायांमतिर्वाश्रद्धधानस्य पुंसोवे ततः किमतआह हरेरि
ति ॥ १३ ॥ एवंभूतायांकथायांयेयनरमंतेतान् शोचतिशोच्यायेतेषामपिशोच्यानस्वतत्वाविदः भावत्वात्पर्यानभि
ज्ञान् शोच्यान् यतस्तावाहरेः कथायांविमुखाः तान् तेषामपिशोच्यान् इतियोन्यम योयमनिमिषःका
लोयेषामायुःक्षपयति यतस्तेषांवृथैववादगतिस्मृतयोवाग्देहमनोव्यापाराः येषां ॥ १४ ॥ ततस्माद्धेकौषा
रवकथासारभूतांहरेः कथामेवोद्धृत्यनः कीर्तयथापुष्पेभ्योमधुमधुपउद्धरति
श्रेयसेत्यर्थः

॥ ॥
१६ तृतीयस्कंधे

16A

श्रीकृष्णस्य कथायां कथनीयेत्याशयेनाह स इति यो विश्वसर्गाद्यर्थं गृहीतशक्तिः स एव बहुकेषु कृतावता
रः सन् गुणपानतिक्रम्य वर्तमानानि चकार पुंसां निःश्रेयसमेर्थ्यर्थं प्रयोजनं तेन हेतुना पृष्टः ॥१७ बहुमा
नमेवाह साधीति पंचभि श्रोतॄणां लोकानां मनुः यस्य तस्यात्मनः स्वस्य कीर्तिं वयसंगाद्वितन्वतः ॥१८ हरिर्य
गृहीतः एतच्चित्रं न भवति अतो बादरायणवीर्यजे ॥१९ तदेव कथयन्नेव कथयन्त्वा लोकान्ग्राहयन्ति एतच्चित्रं।

भवे प्रजन्मस्थितिसंयमार्थं कृतावतारः प्रगृहीतशक्तिः चकार कर्माण्यतिपूरुषाणि यानीश्वरः
कीर्तय तानि मह्य ॥१६ श्रीशुक उवाच स एवं भगवान्पृष्टः क्षत्त्रा कौषारविर्मुनिः पुंसां निःश्रेयसा
र्थेन तमाह बहुमानयन् ॥१७ श्रीमैत्रेय उवाच साधु पृष्टं त्वया साधो लोकान्साध्वनुगृह्णता की
र्तिं वितन्वता लोके आत्मनोऽधोक्षजात्मनः ॥१८ नैतच्चित्रं त्वयि क्षत्तर्बादरायणवीर्यजे गृहीतोऽनन्य
भावेन यत्त्वया हरिरीश्वरः ॥१९ माण्डव्यशापाद्भगवान्प्रजासंयमनो यमः भ्रातुः क्षेत्रे भुजिष्यायां
जातः सत्यवतीसुतात् ॥२० भवान्भगवतो नित्यं संमतः सानुगस्य च यस्य ज्ञानोपदेशाय मादिशद्भग
वान्व्रजन् ॥२१ अथ ते भगवल्लीला योगमायोपबृंहिताः विश्वस्थित्युद्भवान्तार्था वर्णयाम्यनुपूर्व
शः ॥२२॥

ते तथाहमाण्डव्यशापादिति भ्रातुर्विचित्रवीर्यस्य क्षेत्रे क्षेत्रत्वेन स्वीकृतायां भुजिष्यायां दास्यां समप
वत्वं जातोऽसि ॥२० किंच न भवानिति क्रतः यस्य तव ज्ञानोपदेशाय मां समादिष्टवान् कृष्णस्त्वयमपि स्वलो
कोपरिष्टवानिति ॥२१ विश्वस्थित्यादयोऽर्था विषया यासां ताः ॥२२॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा तृ
टी
२

17

तत्र सृष्टिलीलां वर्णयितुं पुनः सर्वावस्थामाह इदं विश्वमग्रे सृष्टेः पूर्वमेव परमात्मा भगवानेक एवास आसीत् आ
त्मनां जीवानामात्मा स्वरूपं विभुः स्वामी च नानात्वं द्रष्टृदृश्यादिमतिभिर्नोपलक्ष्यत इति तथा यद्वा प्रकारान्तरेणैव वि
नैवायमर्थः यः स्रष्टा नानामतिभिरुपलक्ष्यते स तदा एक एवासीदिति कुतः आत्मेच्छा या माया तस्या अनुगतौ लये स
ति यदा आत्मन एकाकित्वेनावस्थाने इच्छा या आत्मानुगतमायामित्यर्थः २३ तत्र तत्प्रथमं मायोद्भवप्रकारमाह द्वाभ्यां स
वै द्रष्टा सन् दृश्यं नापश्यत् यत एकराट् एक एव तस्मिन्समये प्रकाशते असन्तमिव मेने दृश्याभावे द्रष्टृत्वाभा

भगवानेक आसेदमग्र आत्मात्मनां विभुः आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः २३ स वा एष
तदा द्रष्टा नापश्यद्दृश्यमेकराट् मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक् २४ सा वा एतस्य संद्रष्टुः
शक्तिः सदसदात्मिका माया नाम महाभाग ययेदं निर्ममे विभुः २५ कालवृत्त्या तु मायायां गुणम
य्यामधोक्षजः पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्य
वान् २६

वात् तदा सुप्ता मायाख्या शक्तिर्यस्य सः नन्तं संतमिव मेने असुप्ता अलुप्ता दृक् चिच्छक्तिर्यस्येति २४
सा वै द्रष्टुर्दृश्यानुसंधानरूपा सदसदात्मिका कार्यकारणरूपा यद्वा सद्दृश्यमसत्त्वेन दृश्य आत्मा स्वरूपं तयो
रात्मा यस्याः तदुभयानुसंधानरूपत्वात् २५ कालवृत्त्या कालशक्त्या गुणमय्यां क्षुभितगुणायामधोक्ष
जः परमात्मा आत्मांशभूतेन पुरुषेण प्रकृत्यधिष्ठात्रा रूपेण वीर्यं चिदाभासं समाधत्त वीर्यवान् चिच्छक्तियुतः

टी
१७

17A

कालेप्रेरितादव्यक्तान्मायातः तत्त्वपदं परित्यज्य महत्तत्त्वलक्षणं अत एव पुंलिंगनिर्देशः विज्ञानात्मेति सत्त्वप्रधानत्वा
त्स्वदेहस्थं विश्वं व्यंजन् बीजवन्निमग्नं स्फुटरूपेणाभिव्यक्तं प्रकाशयन् तमोनुदत्वात् तमोनुदः तदुक्तं सात्वततन्त्रे वि
ष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितं तृतीयं सर्वभूतस्थं तानि।
ज्ञात्वा विमुच्यते इति २७ अहंकारोत्पत्तिमाह सार्धाभ्यां सोपीति अंशाः चिदाभासास्तैर्गुणाः उपादानं का।
लः आत्मकः तदधीनो भगवान् सर्वाध्यक्षः तद्दृष्टिगोचरः सन् स्वयमात्मानं व्यक्तमेतद्रूपेणान्तरसृजत २८ अहं

ततोऽभवन्महत्तत्त्वमव्यक्तात्कालचोदितात् विज्ञानात्माऽऽत्मदेहस्थं विश्वं व्यंजंस्तमोनुदः २७
सोऽप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया
२८ महत्तत्त्वाद्विकुर्वाणादहंतत्त्वं व्यजायत कार्यकारणकर्त्रात्मा भूतेंद्रियमनोमयः २९ वैका
रिकस्तैजसश्च तामसश्चेत्यहं त्रिधा अहंतत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत् ३०
वैकारिकाश्च ये देवा अर्थाभिव्यंजनं यतः ३०

कारस्य लक्षणमाह कार्यमधिभूतं कारणमध्यात्मं कर्ता अधिदैवं तेषामात्मा आश्रयः अत्र हेतुः भूतें
द्रियमनोमयः तद्विकारवान् मन इति देवानामप्युपलक्षणं २९ गुणदेवविभागतः प्रपंचयिष्यति वै।
कारिक इत्यादिना वैकारिकः सात्विकः तैजसो राजसः देवाश्च वैकारिकाः कार्यभू
ताः इत्यर्थः यतो येभ्य इंद्रियाधिष्ठातृभ्यः अर्थाभिव्यंजनं शब्दादिप्रकाशो भवति ३०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

18

श्री
भाग.
टी.
१८

तैजसानेवेयनयुः सात्वमयानांशक्तिकत्वप्रसंगो मा भूदित्येवकारः तामसो भूतसूक्ष्मस्य शब्दस्यादिकारणं यतः शब्दात्
खमाकाशं भवति आत्मनो लिंगं स्वगुणशब्दरूपेण प्रकाशकं हृदयाकाशेन यावच्च यद्वा लिंगं शरीरं आकाशशरीरं
ब्रह्मेति श्रुतेः २१ नभसः स्वस्मादनुसृतं नमद्भूतं स्पर्शं विकुर्वाणेन यावच्च यद्वा लिंगशरीरं पूर्ववन्निरूपितं तन्मात्रमानयत् एवं
सर्वत्र तन्मात्रद्वारा भूतोत्पत्तिरिति ज्ञातव्यं २२ नभसः सहितः स्वरूपेणाऽरुबलान्वितः तेजो ज्योतिः लोचनं प्रकाशकं
२३ २४ २५ हे ब्रह्मविदुर परान्तेरभावे कार्यं यद्यद्भवनं कार्यं तेषां कार्याणां परैः कारणैः अनुसंसर्गात् अन्वयात्

तैजसानीन्द्रियाण्येव ज्ञानकर्ममयानि च तामसो भूतसूक्ष्मादिर्यतः खं लिंगमात्मनः २१ कालमायांश
तेनमः योगेन ब्रह्मवीक्षितं नभः नभसोऽनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलं २२ अनिलोऽपि विकुर्वाणो नभसोरुबला
न्वितः ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनं २३ अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितं आध
त्ताम्भो रसमयं कालमायांशयोगतः २४ ज्योतिषाम्भोऽनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितं महीं गंधगुणा
माधात्कालमायांशयोगतः २५ भूतानां नभआदीनां यद्यद्भव्यपरावरं तेषां परानुसंसर्गाद्यथासं
ख्यं गुणान्विदुः २६ एते देवाः कला विष्णोः कालमायांशलिंगिनः नानात्वात्स्वक्रियानीशाः प्रोचुः
प्रांजलयो विभुं २७ ॥

यथासंख्यं यथाक्रमं उत्तरोत्तरमधिकान् गुणान्विदुः तथा हि नभसः शब्द एव गुणः अन्यान्वयाभावात् वायो
स्तु स्पर्शः आकाशान्वयाच्छब्दश्च एवं तेजसो रूपं च अम्भसो रसश्च महत्याः सर्वे देवा महदाद्यभिमानिनः
विष्णोः कलाः अंशाः कालो लिंगं विकृतिः माया लिंगं विक्षेपः अंशो लिंगं चेतना तानि विद्यन्ते येषु ते अतः समवे
तनानात्वात् परस्परसंबंधात् स्वक्रियायां ब्रह्माण्डरचनायां अनीशा असमर्थाः सन्तो विभुं परमेश्वरं प्रोचुः २७
॥ ॥

१८

राथः ४० ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

87-A

समुदितः सम्यक्कृतकः सन्नुतेमदक्षिणीकृत्य ४१ मुनीनांव्रतंमौनंनअहिंसादिलक्षणं ४२ सदसतः परंयत्र।
स्मिन्ब्रह्मणिगुणावभासकेतेगुणैएकभक्त्याश्रवणादिभिर्वाविष्णाभक्त्याअनुभाविते अपरोक्षीकृते ४३ आत्म
देहादिष्वहंकाररहितः अतएवनिर्द्वंद्वः शीतोष्णाद्यनाकुलः सम्यक्‌भेदग्राहकः एकत्वदृक्‌स्वदृक्‌स्वमे।

श्रीमैत्रेयउवाच एवंसमुदितस्तेनकपिलेनप्रजापतिः दक्षिणीकृत्यतंप्रीतोवनमेवजगामह ४१
व्रतंसआस्थितोमौनमात्मैकशरणोमुनिः निःसंगोव्यचरत्क्षोणीमनग्निरनिकेतनः ४२ मनोब्रह्म
णियुंजानोयत्तत्सदसतःपरं गुणावभासेविगुणएकभक्त्यानुभाविते ४३ निरहंकृतिर्निर्ममश्चनि
र्द्वंद्वः समदृक्स्वदृक् प्रत्यक्प्रशांतधीर्धीरः प्रशांतोर्मिरिवोदधिः ४४ वासुदेवेभगवतिसर्वज्ञे
प्रत्यगात्मनि परेणभक्तिभावेनलब्धात्मामुक्तबंधनः ४५ आत्मानंसर्वभूतेषुभगवंतमवस्थितं
अपश्यत्सर्वभूतानिभगवत्यपिचात्मनि ४६ इच्छाद्वेषविहीनेनसर्वत्रसमचेतसा भगवद्भक्तियु
क्तेनप्राप्ताभागवतीगतिः ४७ इतिश्रीभागवतेतृतीयस्कंधेचतुर्विंशोध्यायः २४ ॥

राम राम

व्यपश्यन्प्रत्यक्‌स्वात्मानंप्रत्यक्प्रशांताविक्षेपरहिताधीर्यस्य ४४ नदेवेविधिकल्पितोपाधिनिष्ठि
तिगुणात्मकेस्वरूपदर्शनमाह वासुदेवइतित्रिभिः प्रत्यगात्मनिजीवस्यात्मनिलब्धआत्माविततेयेन
यतोमुक्तबंधनमतानंतस्यत्वात्मनामेवाह आत्मानमिति ४६ नदेवेतेनभागवतीगतिः प्राप्ताभाग
वतोगतिःप्राप्तइति ४७ इतिश्रीभागवतेतृतीयचतुर्विंशः २४ ॥ "

पंचविंशेजनन्यात्मदृष्टैबंधविमोचने प्राहस्वाहपरंभक्तिलक्षणंकपिलःस्मृतः कपिलेनार्पितमात्रेगच्छ।
भावान्निवेदिना योगमार्गिकामेजयास्फुटंसुहृद्याश्रातेधुना उक्तानुवादएवंकेकापिलेयोगेपृच्छतिकस्मि
न्हेतुनिरिभिः नत्वानोमेख्यातागणकः सांख्यप्रवर्तकोऽस्यार्थः प्रतएवस्वयंजातः आत्मप्रज्ञप्तयेस्वा।
त्मतत्वज्ञापनाय । पुंसामध्येवर्ष्मणः वृद्धस्योत्तमस्येत्यर्थः सर्वयोगिनांमध्येवरिम्णः वरस्यभावोव।
रिमाभवितत्प्रधानोयेनिर्देशः वरिष्ठस्येत्यर्थः यद्वावरीयस्त्वादित्यर्थः विश्रुतोकीर्तौश्रसवइंद्रियाणि

शौनकउवाच कपिलस्तत्वसंख्याताभगवानात्ममायया जातःस्वयमजःसाक्षादात्मप्रज्ञप्तयेनृ।
णां । नह्यस्यवर्ष्मणःपुंसांवरिम्णःसर्वयोगिनां विश्रुतौश्रुतदेवस्यभूरितृप्यंतिमेऽसवः २ य
द्यद्विधत्तेभगवान्स्वछंदात्मात्ममायया तानिमेश्रद्दधानस्यकीर्तन्यान्यनुकीर्तय ३ सूतउ।
वाच द्वैपायनसखस्त्वेवंमैत्रेयोभगवांस्तथा प्राहेदंविदुरंप्रीतःआन्वीक्षिक्यांप्रचोदितः ४
मैत्रेयउवाच पितरिप्रस्थितेरण्यंमातुःप्रियचिकीर्षया तस्मिन्बिंदुसरेऽवात्सीद्भगवान्कपि।
लःकिल ५ तमासीनमकर्माणंतत्वमार्गाग्रदर्शिने स्वसुतंदेवहूत्याहधातुःसंस्मरतीव
वः ६ ॥

भूरिबहुतेनतृप्यंतिश्रुतेनश्रवणेनदीव्यंतियोतंतेऽसवइति तथातस्ययद्वाभूरिबहुशःश्रुतोदेवोयेनत
स्यापिमेप्रसवइतिसंबंधः २ स्वात्मोच्छंदोनेच्छयात्मादेहोयस्यसः यद्यत्कर्मविधत्तेतानितानिका।
र्माणिकीर्तनार्हाण्यनुकीर्तय ३ यद्यात्वंमांप्रचोदयतिएवंप्रचोदितःसन् तथातत्वश्रात्रुसारे
णआन्वीक्षिक्यामात्मविद्यायां ४ बिंदुसरेबिंदुसरसि ५ बिंदुसरसितत्वमार्गस्याग्रेपरंद्र
ंवतीतितस्या एवमानावितेगर्भप्रविष्टइत्यादिधातुर्वचः ६

88A

अप्रसन्नामिंद्रियाणांतर्पणात् विषयाभिलाषान्निर्विरक्तांतात्मेयेन संभाव्यमानेन हर्षमाणेन ७ पारेंग
गमयतीति पारंगतमेव श्रेष्ठं वत्समेया लब्धेन दत्तुग्रहात् जनकनामेनेभाव्यसति ८ तस्मापंचयातियइतिस भग।
वोऽन्नत्वरूपंउदितः यथा स्तये: ९ अपाकृष्ठतुपनेत्वेकोऽसौ सेमोहः नमोहं यतस्मिन्देहादौ नयैव योजितो

मे२

देवहूतिरुवाच निर्विस्मानितवांभूमन्नसदिंद्रियतर्पणात् येनसंभाव्यमानेन सपन्नांधंतमःप्रभो ७
तस्यांतनसेवाधस्यउष्यारस्यापारगं सत्वदंजेन्मनामंतेलब्धेनदत्तु ग्रहात् ८ यस्त्राद्यो भग।
वान्पुंसामीश्वरोवैभवान्किल लोकस्यांधतमोंधस्य चक्षुःसूर्य इवोदितः ९ अथमेदेवसंमोहं
अपाकष्टुं त्वमर्हसि योवग्रहोऽहंममेतीत्यनात्मन्योजितः त्वया १० तं त्वागताहं शरणं शरण्यं स्व
भृत्यसंसारतरोः कुठारं जिज्ञासयाहं प्रकृतेः पूरुषस्य नमामि सद्धर्मविदांवरिष्ठं ॥ मैत्रेयउ
वाच इतिस्वमातुर्निरवद्यमीप्सितं निशम्य पुंसामपवर्गवर्धनं धियाभिनंद्यात्मवतां सतांग
तिर्बभाषईषत्स्मितशोभिताननः १२ श्रीभगवानुवाच योगआध्यात्मिकः पुंसां मतोनिःश्रेय
साय मे अत्यंतोपरतिर्यत्र दुःखस्य च सुखस्य च १३ ॥ ॥ ॥ ॥

योऽहं ममेत्यवग्रहः अग्रहो द्वितीयइतिवाह्यतत्कार्यरागादियह णार्थः १० प्रकृतेः पुरुषस्य नि
ज्ञासया त्वामहं शरणं गतास्मीत्यन्वयः उत्तमश्लोकेत्वार ॥ अपवर्गवर्धनं मातुर्वचनिजनकं
ईषत्स्मितेनशोभितमाननं यस्य १२ अध्यात्मिक आत्मनिष्ठः यत्रयस्मिन् १३ ॥

89

श्री भाग टी ८५

सर्वांगनैपुण्यं चित्तसंयमादि तत्र सर्वांगनैपुण्यं चित्तसंयमाधीनमिति दर्शयन्नाह चेत इति अस्यात्मनो जी-
वस्य गुणेषु विषयेषु पुंसि परमेश्वरे वा रतं बन्धमोक्षार्थं १५ यथा चित्तसंयमे पुरुषार्थसिद्धिस्तद् दर्शयति
अहंममाभिमानोत्थैः मलैर्वीतं विरहितं यदा शुद्धं भवति मनः शुद्धेः स्वरूपमाह अदुःखमसुखमिति १६ निर्वृ-
तं निर्भेदं अणिमानं सूक्ष्मम् अखण्डितम् अपरिच्छिन्नं १७ हतौजसं लीनवत्ता १८ मनःशुद्धौ च भक्तिः

तमिमं ते प्रवक्ष्यामि यमवोचं पुरानघे ऋषीणां श्रोतुकामानां योगं सर्वांगनैपुणं १४ चेतः खलु
अस्य बन्धाय मुक्तये चात्मनो मतं गुणेषु सक्तं बन्धाय रतं वा पुंसि मुक्तये १५ अहंममाभिमानोत्थैः
कामलोभादिभिर्मलैः वीतं यदा मनः शुद्धमदुःखमसुखं समं १६ तदा पुरुष आत्मानं केवलं
प्रकृतेः परं निरन्तरं स्वयंज्योतिरणिमानमखण्डितं १७ ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्म-
ना परिपश्यत्युदासीनं प्रकृतिं च हतौजसं १८ न युज्यमानया भक्त्या भगवत्यखिलात्मनि सदृ-
शोस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये १९ प्रसंगमजरं पाशमात्मनः कवयो विदुः स एव सा-
धुषु कृतो मोक्षद्वारमपावृतं २० तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनां अजातशत्रवः
शान्ताः साधवः साधुभूषणाः २१ मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढां मत्कृते त्यक्तक-
र्माणस्त्यक्तस्वजनबान्धवाः २२ मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च तपन्ति विविधा-
स्तापा नैतान्मद्गतचेतसः २३

भक्तेर्योगसाधनमित्याह तेनेति प्रसंगः सर्वस्यापि संगो मन्तुमित्याह प्रसंगमिति अपावृतं निरावरणं १९
लोकाश्रवेत्र २० साधूनां लक्षणमाह तितिक्षव इति चतुर्भिः साधवः शास्त्रानुवर्तिनः साधुसुशीलं भूष-
णं येषां २१ एतेषां तापा आध्यात्मिकादयो न तपन्ति न व्यथयन्ति कुतो मद्गतं चेतो येषां तान् यतो नापेना

89-A

सत्संगस्यभक्त्यंगत्वमुपपादयति सतामिति २४ वीर्यस्यसम्यग्वेदनं यासुताः वीर्यसंविदः हृत्कर्णयोरसायनाः
सुखदाः तासांजोषणात्सेवनात् अपवर्गोऽविद्यानिवृत्तिर्वर्त्म यस्मिंस्तस्मिन् हरौ श्रद्धाप्रथमं ततोरतिः ततोभ
क्तिः प्रेमभक्तिः अनुक्रमिष्यति क्रमेणभविष्यतीत्यर्थः २५ ततः किमतआह भक्त्येति ममरचनायाः सृष्ट्यादिलीलात
स्याअनुचिंतयाभक्त्यासत्याऐंद्रियात् सुखात् जातविरागः सन् दृष्टश्रुतात् ऐहिकामुष्मिकात् ततोय

तएतेसाधवः साध्विसर्वसंगविवर्जिताः संगस्तेष्वथतेप्रार्थ्यः संगदोषहराहिते २४ सतांप्रसंगा
न्ममवीर्यसंविदोभवंतिहृत्कर्णरसायनाः कथाः तज्जोषणादाश्वपवर्गवर्त्मनिश्रद्धारतिर्भक्ति
रनुक्रमिष्यति २५ भक्त्यापुमान्जातविरागऐंद्रियाद्दृष्टश्रुतान्मद्रचनानुचिंतया चित्तस्ययत्तो
ग्रहणेयोगयुक्तोयतिष्यतेऋजुभिर्योगमार्गैः २६ असेवयायंप्रकृतेर्गुणानांज्ञानेनवैराग्यवि
जृंभितेन योगेनमय्यर्पितयाचभक्त्यामांप्रत्यगात्मानमिहावरुंधे २७ देवहूतिरुवाच काचि
त्त्वय्युचिताभक्तिः कीदृशीममगोचरा ययापदंतेनिर्वाणमंजसान्वाश्नवाअहं २८ योयोगोभ
गवद्बाणोनिर्वाणात्मंस्त्वयोदितः कीदृशः कतिचांगानियतस्तत्त्वावबोधनं २९ ॥

त्तोयुक्तः सन् चित्तस्यग्रहणेवशीकरणेयतिष्यति ऋजुभिर्भक्तिप्रधानत्वादनायासैः २६ तदेवंप्रकृतिर्गुणानामसे
वयाज्ञानादिभिश्चप्रत्यंजीवइहैवदेहेमामेवरुंधेप्राप्नोति २७ काचिदितिकाचिदित्यर्थः उचितायोग्या
तत्रापिममास्त्रियाः कीदृशीगोचरायोग्या निर्वाणात्मकंतवपदंस्वरूपंअन्वाश्नवैप्राप्नवानि अहंयासाः अ
नुध्यानेनत्वमेवसर्वात्मनाप्राप्स्यामि अंजसाविनिपातेन अहंनितिसंबंधः २९ भगवद्बाणोभगवं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

90

श्री भाग टी॰

विजानीहि विशेषेण ज्ञापय मम स्वं प्रपन्नाया मे न ॥ ३० ॥ इत्थं मातुः स्वं प्रयोजनं विदित्वा जातस्नेहस्तेनेहेतुः यत्र
यस्मात् तत्त्वाद्देहेनाविर्भूतः तत्त्वान्याम्नायन्ते प्रत्यक्षमन्येभ्य इति किं तत्सांख्यं भवदेति नन्वभिवाच भक्तिर्वि
नानैव योगेच ॥ ३१ ॥ कापिल तत्त्वविज्ञानं भक्तिविनिष्ठं अमुत्तमां भक्तिं लक्षयति गुणा विषयास्तेषां लिंगं ज्ञा
यन्ते यैः तेषां देवानां ज्ञानकर्मकाणामिन्द्रियाणां तदधिष्ठातृणां वा सत्त्वे सत्त्वमूर्तौ हरावेव या वृत्तिः सा
भक्तिः सिद्धेर्मुक्तेरपि गरीयसीत्युत्तरेणान्वयः कथंभूता अनिमित्ता निष्कामा स्वाभाविकी अयत्नसि

द्धेत्यर्थः ॥ ततः किमित्याह एवंभूतोऽपि विद्याह्रदयं मन्दधीर्हरेः सर्वं गुणपञ्चविंशेयोषा भवदनुग्रहात् ॥ ३१ ॥ मैत्रेय उवा
च विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः तत्त्वाम्नायं यत्प्रवदन्ति सांख्यं
प्रोवाच वै भक्तिवितानयोगं ॥ ३२ ॥ श्रीभगवानुवाच देवानां गुणलिंगानामानुश्रविककर्म
णां सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ३२ अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी
जरयत्याशु या कोशं निगीर्णमनलो यथा ॥ ३३ ॥ नैकात्मतां मे स्पृहयन्ति केचिन्मत्पादसेवा
भिरता मदीहाः ये न्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणि ३४ ॥

ह्यतेषामेवं विधत्वे हेतुमाह गुरोरुच्चारणमनुश्रूयते इत्यनुश्रवो वेदः तद्विहितमानुश्रविकं
कर्म येषां मनस एवैकं एकरूपमविक्षिप्तं मनो यस्य पुंसः स्वभावतः स्पर्धः स्वाभाविकी
भवत्येवेत्याह या भक्तिः कोशं लिंगशरीरं जरयति तत्पयति स्वप्रयत्नं विनैव सिद्धा जठरानलः
निगीर्णमन्नमिवेत्यन्नानलो यथान्नं जरयति ॥ ३३ ॥ एवं श्लोकेन सहटीका ॥ ३३ ॥ भक्तेर्गरीयस्त्वमेवो
पपादयति नैकात्मतामिति पंचभिः एकात्मतां सायुज्यमोक्षं मदर्थमीहाः क्रिया येषां ते अन्योन्यतः प्र

स्क॰ ३ अ॰ २५

२३०

90A

यसन्नानि वक्त्राण्य(क)मलानि लोचनानि येषु तैः सम्यग्रूपैः साकं सह नित्यं परमेश्वरानुभवे सुखेन भक्त्यावधिकत्वमि
तिभावः ३४ प्रात्मानेत्यत्र वपुषो भावो न्याहतैरिति निर्दर्शनीया मनोहरा अत्र वयो वा प्रथमेनैवात्मोक्तं येषु तैः हृ
प्रात्मा विविधेषां हृतां प्रकृष्टाः प्राणा सुहृद्याणि येषां तैर्नाम भगवतः प्रतिकृतः इत्यादीनाना पि या।
एवीग तिम्नानि(?) प्रयुंक्ते प्रापयतीति केः सर्थनेहृतानानः उद्दामैर्विलासैर्बासेमनोहरैः सकले मधुरभाषणे ३६
विभत्यादिके वनवाधिक मित्याह प्रयोअविवियानि वृधमनंतरं विभूतिसम्पत्तोकादिगतां भोगसंपन्नि प्र

४ मादिभिः नवविलासैर्लीला

परमं तिभिमूकविरागपववसेनः प्रसन्नवक्त्राम्भ(क)मललोचनानि रूपाणिपादिव्यानि वरमराणि साकं
तावं स्पृहणीयो वर्तते ३५ तैर्दर्शनीयावयवैर्वदारविलासहासैर्दिनवाभसत्कैः हृतात्मनोह
नग्राणाश्च भक्तेर्वानि च्छुतां मे गतिमाप्नोति प्रयुंक्ते ३६ प्रयोविभूतिमममायिनस्तामेष्टयमष्टगाम
तुप्रवृत्तैः श्रियंभागवतीं वाः स्पृहयंति भद्रां परस्यमेते प्रभुवतेनलोके ३७ नकर्हिचिन्मत्पराः शा
न्तरूपेनंक्ष्यंतिनाः निमिषोलीढहेतिः येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टं ३८

तिमाद्यष्टांगमैश्वर्यमनुप्रवृत्तं भक्तिमनुस्वतएवयाभिमपि भागवतीं वा श्रियं वैकुंठस्यां संपत्तिमस्पृह
यंतिनेयद्यपि नस्पृहयंती त्यर्थः तथापि तेमल्लोके वैकुंठे प्रभुवंते प्राप्नुवंत्येव ३७ नन्वेवं तर्हि लोक
नाविशेषात्स्वर्गादिवद्वैकुंठभोगानामपि कदाचिद्विनाशः स्यान्नेत्याह हे शान्तरूप यद्वा शांतेशुद्धे रूपे सत्वेता।
रूपवैकुंठे मत्पराः कदाचिदपि न नंक्ष्यंति भोगहीना न भवंति मनिमिषो मे हेतिश्चक्रं दीर्घकालत्वबन्धे
वृत्तो लीढि तान्न ग्रसति तत्र हेतुः येषामिति सुतनहेत्वस्नेहविषयः सखा विश्वासास्पदं गुरुरुपदेष्टा

91

श्री
भाग.
३।

उभयायिनं लोकद्वयगामिनं आत्मानं सोपाधिकं आत्मानमनु ये पुत्रकलत्रादयः ये च पश्वादयो रायः धनानि
३९ अन्यांश्च परिगृहान् मृत्योः संसारात् अतिपारये तितारयामि ४० अभक्तानां तु कथंचिदपि न मोक्ष इत्याह ४१
मद्भगवतोन्यत्र भगवतो मत्तो विना सर्वभूतानामात्मनः भगवदादिविशेषणत्रयेण सामर्थ्यं निरपेक्षत्वं हित
कारित्वं चोक्तं ४२ ये सर्वे स्वकृत्यं कुर्वंति श्रुतिश्च भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्यु

इमंलोकंतथैवामुंआत्मानमुभयायिनं आत्मानमनुयेचेहयेरायःपशवोगृहाः ३९ विसृज्यसर्वा
नन्यांश्चमामेवंविश्वतोमुखं भजंत्यनन्ययाभक्त्यातान्मृत्योरतिपारये ४० नान्यत्रमद्भगवतःप्र
धानपुरुषेश्वरात् आत्मनःसर्वभूतानांभयंतीव्रंनिवर्तते ४१ मद्भयाद्वातिवातोयंसूर्यस्तपतिम
द्भयात् वर्षतींद्रोदहत्यग्निर्मृत्युश्चरतिमद्भयात् ४२ ज्ञानवैराग्ययुक्तेनभक्तियोगेनयोगिनः
क्षेमायपादमूलंमेप्रविशंत्यकुतोभयं ४३ एतावानेवलोकेस्मिन्पुंसांनिःश्रेयसोदयः तीव्रेण
भक्तियोगेनमनोमय्यर्पितंस्थिरं ४४ इतिश्रीभागवतेतृती
यस्कंधेपंचविंशोध्यायः २५

र्धावति पंचम इति ४२ मद्भजनादेव मोक्ष इति अन्वयव्यतिरेकाभ्यां प्रमाणयन् निगमनेन तदुपसंहरति एतावानिति
४३ मय्यर्पितं मनः तु स्थिरं भवतीति यत्तत् एतावानेव ४४ इतिश्रीभावार्थदीपिकायां तृतीयस्कंधे पं
चविंशोध्यायः २५ षड्विंशे तु प्रकृत्यादितत्त्वविवेकायापवर्गदं तत्सांख्येन सर्वभावानां जन्मलक्षणभेदतः

। ३।

91A

धात्मगुणाश्रयत्वात्कर्तृत्वेनमिथ्याभिमानेनयत् मात्रेसांख्येवदाख्यातेप्राधान्येनाहंतन्मविन तन्मात्मयंयमश्चवत्वदे।
तिसांख्येभक्तियोगश्चेतित्रयमपादितंमनत्रभक्तिरुक्ता इदानींसांख्यमाहस्रग्रथितिः १ नत्रगुणेभ्योतिरात्मज्ञानादेव
नत्तु नत्त्वलक्षणज्ञानात् तमेवविदित्वातिमृत्युमेतीतिश्रुतेः अतस्तदाहज्ञानमितिवात्मदर्शनरूपंज्ञानेनप्रवय
वहृदयग्रंथिभेदनप्रहेतुकारणनिवर्तकेप्रकृतिवियोगानिःश्रेयसमितिसांख्याः तिस्रोयमस्ययोगेनान्तायस्य।
दात्क्तः ततेवर्णयाम्यामिततत्त्वलक्षणज्ञानोदयविविक्तात्मज्ञानंभवतीतिभावः २ तत्रपुरुषलक्षणमितिप्रश्ना।
दिविनिश्चात्मेवपुरुषः पुरिपुरिशेतेइतिकोसावात्मायन्यक्तपतिलोमधामतेजः स्फूर्तिर्यस्यलक्षणमित्र

श्रीभगवानुवाच अथातेसंप्रवक्ष्यामितत्त्वानांलक्षणंपृथक् यद्विदित्वाविमुच्येतपुरुषःप्रकृ
तेर्गुणैः १ ज्ञानंनिःश्रेयसार्थायपुरुषस्यात्मदर्शनं यदाहुर्वर्णयेतत्तेहृदयग्रंथिभेदनं २ अ
नादिरात्मापुरुषोनिर्गुणःप्रकृतेःपरः प्रत्यग्धामास्वयंज्योतिःविश्वंयेनसमन्वितं ३ ॥

एतत्सर्वमवतेयानिप्रश्नादिरितिसमयप्रकृतिसत्त्वामिति तथाचोक्तंसांख्येसोत्पत्तिस्तदनुपपत्तावितिनाभावा
कार्यतः तदुपलब्धेः महदादितच्चकार्यंप्रकृतिविरूपंसरूपंचेतित्रिगुणत्वादेतिमानात् मातुरप्यंगुष्ठा
दिहेतुमत् प्रकृतिरहेतुमत् इतिविरूपसमासविकल्पत्वेसावर्तस्यपिप्रकृतेःपरः अन्यःसंगः ज्ञाना।
दिगुणवत्त्वेसावयवानितिनिर्गुणः ज्ञानेतत्स्यस्वरूपंमवमोनमेसकायमिमतेज्ञानविषयत्वेवास्यतिस्व
यंज्योतिः अनेनैवप्रमाकरामिमतंज्ञानान्तरवेद्यत्वेनस्फुरत्त्वमपिनिरस्तंस्वयंज्योतिष्ट्वे हेतुः विश्वंयेन
समन्वितंप्रकाशितंइतिविशेषः एतैश्चहेतुभिःपुरुषस्यप्रकृतेःपरत्वमपिसिद्धं ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रज्ञावरणविक्षेपशक्तिभेदेन प्रकृतिर्द्विविधा तत्रावरणशक्त्यात्मैव जीवोपाधिरविद्या विक्षेपशक्त्यात्मैव
मायोपाधिरीश्वरः पुरुषश्च जीवेश्वररूपेण द्विविधः तत्र यः प्रकृत्यविवेकेन संसरति स जीवः यस्त्वश
क्तिं वशीकृत्य विश्वसृष्ट्यादिकं करोति स परमेश्वरः शरीरादिकार्योपाधिर्जीवः कारणोपाधिरीश्व।
रः सोऽयं पुरुषो मायया स जीवो माययस्यादितः तत्र प्रकृत्यविवेकेन जीवस्य संसारमाह स एष इति पञ्च
भिः सूक्ष्मामव्यक्तां दैवीं देवस्य विष्णोः शक्तिं लीलयोपगतां यदृच्छयैवाभिपद्यतेत्यन्वयः तस्याः।
लीलामाह गुणैर्विचित्रा इति तानेव गृहीत्वावृणोतीति तान् गृहीत्वा यातथा च श्रुतिः अजामेकां लोहितकृ।

स एष प्रकृतिं सत्त्वां दैवीं गुणमयीं विभुः यदृच्छयैवोपगतामभ्यपद्यत लीलया ४ गुणैर्वि।
चित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ५ एवं पराभि।
ध्यानेन कर्तृत्वं प्रकृतेः पुमान् कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ६ तदस्य संसृतिर्बन्धः
पारतन्त्र्यं च तत्कृतं भवत्यकर्तुरीशस्य साक्षिणो निर्वृता
प्र.जी त्मनः ७ ॥

ष्णशुक्लां बह्वीं जनयन्तीं सरूपां अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः इति मुमुहे।
आत्मानं विस्मृतवान् ५ पराभिध्यानेन प्रकृत्यध्यासः अन्यस्मिन्नन्यधर्मावभासः अध्यासः अन्यधर्माध्यासः
तेन प्रकृतेर्गुणैः कर्मसु क्रियमाणेषु कर्तृत्वमात्मनि मन्यते ६ तदिति कर्तृत्वमननमेवास्य पुरुषस्य
साक्षिमात्रत्वादकर्तुरेव सतः कर्मभिर्बन्धः ईशस्य स्वतन्त्रस्यैव कर्मबन्धकृतभोगपारतन्त्र्यं निर्वृतात्म
नः सुखात्मकस्यैव संसृतिर्जन्ममरणप्रवाहः प्रकृत्यविवेककृतमेतत्सर्वं भवतीत्यर्थः ७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

92A

ननु चैतन्यमात्रस्याधिकरणत्वेन पक्षकर्तृत्वादिप्रतीतेः तस्यैव तदङ्गीक्रियतां तेनाह कार्यं शरीरं करणानीन्द्रि
येकदेशेवतावर्गः तद्भावापन्नो पुरुषस्य प्रकृतिकार्याणां विद्धि कूटस्थस्य स्वतो विकाराभावात् प्रकृतिप
रिणामभूतदेहाद्यहंकारकृतमेव कर्तृत्वादिकमित्यर्थः भोक्तृत्वेन तु पुरुषं कारणं विद्धि नित्यस्यापि भा
वः यद्यप्यहंकारगतमेव कर्तृत्वादिकं भोक्तृत्वं च तथापि विकारस्य जडस्य स्वसानत्वाद् रूपाधिष्ठानभूते भो
क्तस्य विदवसानत्वात् तदुपहितं प्रधानमिति १९ तदेवं संसारिणं पुरुषं तद्धेतुं प्रकृतिं च ज्ञात्वेदानीं जग
त्कारणानीश्वरं तत्प्रकृतिं विद्धि तत्प्रकृतेरिति अस्याविषयस्य सदसत्त्वस्य स्थूलसूक्ष्मं वकार्यं यदात्मके ॥

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते भोक्तृत्वे स्वपदः स्वात्मा पुरुषं प्रकृतेः परम् १९ देव
हूतिरुवाच प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ब्रूहि कारणयोरस्य सदसच्च यदात्म
कं ॥ श्रीभगवानुवाच यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकं प्रधानं प्रकृतिं प्राहुरविशे
षं विशेषवत् ॥ पंचभिः पंचभिर्ब्रह्म चतुर्भिर्दशभिस्तथा एतच्चतुर्विंशतिकं गणं प्राधानि
कं विदुः ॥

तयोः प्रकृतिपुरुषयोः तत्र प्रकृतिं तत् तयति यत्प्रधानं स्वतो विशेषं सत्त्वरजस्तमसां सा
म्यावस्था इति वचनात् अविशेषं विशेषवत् विशेषाणां महदहंकारादिकार्याणामाश्रयः नर्हि किं तल्लक्षणं त्रिगुणं
सत्त्व हुः सत्त्वरजस्तमांसि त्रयो गुणाः अनेन सत्त्वादीनां साम्यं गुणानां निरस्तं किं महदादिवत् नेत्यव्यक्तं अ
कार्यं महदादिवत् कार्यं इति भावः किं कालादिवत् सदसदात्मकं कार्यकारणरूपं किं जीववत् प्रकृति नेति नि
त्यं प्रधानमित्यर्थः ॥ अन्येषां तत्त्वानां लक्षणं वक्तुं तानि गणयति पंचभिरित्यादि सार्धेन भेदनपतत्सु

विज्ञानिकं एवानि चवत् विंशानि यं निस्कामितः नैगणः प्राणधातिकं प्रधा
न कार्यात्मकं प्रकारविदुः ११

श्री
भाग
टी
३

एतद्विवृणोति महाभूतानीति त्रिभिः तावंति पंचैव १२ संकल्पविकल्पात्मकं मनः निश्चयात्मिका बुद्धिः अंत-
रात्मकं मनः करणं लक्षणं स्वरूपं च व्यवच्छेदिकया मनसो वृत्तिः संकल्पः बुद्धेर्वृत्तिर्निश्चयः अहंकारस्याभि-
माने १४ एतावान्मया प्रोक्तः एतावानेव संख्यातः गणितः तत्त्वज्ञैः केचित्तु मतद्वयमाह यः कालः स पंचविंशकः
प्रकृतेरेवावस्थाविशेषः इत्यर्थः यद्वा यः पुरुषः इति प्रसिद्धः कालः पंचविंशकः १५ एके तु पौरुषं पुरुषस्यै

महाभूतानि पंचैव भूरापोऽग्निर्मरुन्नभः तन्मात्राणि च तावंति गंधादीनि मतानि
मे १२ इंद्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः वाक्करौ चरणौ मेढ्रं
पायुर्दशम उच्यते १३ मनो बुद्धिरहंकारः चित्तमित्यंतरात्मकं चतुर्धा
लक्ष्यते भेदो वृत्त्या लक्षणरूपया १४ एतावानेव संख्यातः ब्रह्मणः सगु
णस्य ह सन्निवेशो मया प्रोक्तो यः कालः पंचविंश
कः १५ प्रभावं पौरुषं प्राहुः कालमेके यतो भयं
अहंकारविमूढस्य कर्तुः प्रकृतिमीयु
षः १६ प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य
मानवि चेष्टा यतः स भगवान्काल

र्यस्य प्रभावं प्रभावत्त्वलक्षणं विक्रमं कालमाहुः तमेव काले हेधाल्लक्षयति यतो भयं भवति कस्य प्रकृ
तिमीयुषः प्राप्तस्य अत एव देहे आत्माभिमानिनः अहमेव कर्ता इति अहंकारेण विमूढस्य कर्तुर्जीवस्य
अनेन संहारकत्वेन लक्षितः सृष्टिहेतुत्वेन लक्षयति प्रकृतेरिति १६ कोऽसौ भगवांस्तमाह १७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

93A

श्रेतः सर्वप्राणिनांयः पुरुषरूपेणानियंतृत्वेन समत्वेन समन्वेति सम्यक्कृतद्विकारं यदितपवाग्रस्थेनोव

नतेनबहिश्चकालरूपेणाथभगवान् यह्नयः पुरुषसिद्धं इति शेषसिद्धः सकालः पंचविंशकः एकेनपुरु

मस्यप्रभावंकालमाहुः प्रभावमेव लक्षणया तदितिपुरुषस्यैव नत्कालत्वे हेतुः प्रकृतेरिति उभयथा

त किन्तयाद्येतः प्रतीतिरिति शेषः समानं देवप्रकृतेः चतुर्विंशतिभेदाः जीवेश्वरयोः चैक्यविवक्षया षड्विंश

तिर्भवति इदानीं तत्त्वानामुत्पत्तिपूर्वकलक्षणमाह १८ एतावत्संख्येयमतः प्राकृतेनेतग्रंथेन चिन्तेया

त्यतिपूर्वकंलक्षणमाह चतुर्भिर्दैवात्जीवदृष्टात् क्षुभिता धर्मा गुणाः यस्यां योनौ प्रभिव्यक्तस्यानेप

यंतः पुरुषरूपेण कालरूपेण यो बहिः समन्वेत्येष सत्वानां भगवानात्ममायया १८ दै

वात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयं १९ वि

श्वमात्मगतं व्यंजन् कूटस्थो जगदंकुरः स्वतेजसापिबत्तीव्रमात्मप्रस्वापनं तमः २० यत्तत्स

त्वगुणं स्वच्छं शान्तं भगवतः पदं यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मनः २१

कृतौ वीर्यं चिच्छक्तिं सा प्रकृतिर्महत्तत्त्वमसूत महतः स्वरूपमाह हिरण्मयं प्रकाशबहुलं १९ वि

श्वमहंकारादिप्रपंचमात्मगतं स्वस्मिन् सूक्ष्मरूपेणास्थितं व्यंजन् महत्तत्त्वं पिबत कूटस्थो लयविक्षे

पशून्यः आत्मानं प्रस्वापयतीति तथा यत्तत्पूर्वं प्रलयसमये महत्तत्त्वं प्रकृतौ विलापयामासेत्यर्थः प्रसे

गात्तचित्तवृत्तेरुपासनमाह २० सर्वागमप्रसिद्धं तत्त्वमाह स्वच्छं शान्तं वाञ्छादिदग्धं भगवतः पदमुप।

लब्धिस्थानं मतः यत्तत्त्वं वासुदेवाख्यं यदाहुः अयमर्थः यद्धिभूतरूपेण तस्यैव महदिति संज्ञा यथा।

सहरूपेणाविश्य ... एवमहंकारोऽसंक ... नियामयति ... ३१।।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

94

८२

श्री
भाग
३ स्कं

स्वछत्वं भगवद्बुद्धिवशाद्वित्वं अविकारित्वं लयविक्षेपराहित्यं यथा प्रकृतिः फेणतरंगादिरहिता।
वस्यापराभूमरुत्समगीतशांतनी सा यथा स्वपणनाचतत्वदित्यर्थः अहंकारस्योत्पत्तिपूर्वकंल
क्षणमाह चेतन्निः २२ क्रियाशक्तिर्यस्य सः क्रियाशक्तिरेत्रिविधमाह २३ तस्य कार्यमाह
यतो यस्मात्मनसां भवदीनांभवत्युत्पत्तिः तस्मिन्नुपास्यरूपमाह २४ २५ कर्तृत्वं देवतारूपेणाक

स्वछत्वमविकारित्वं शांतत्वमितिचेतसः वृत्तिभिर्लक्षणं प्रोक्तं यथापांप्रकृतिः यथा
महत्तत्वाद्विकुर्वाणाद्भगवद्वीर्यसंभवात् क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत स्वै
वैकारिकस्तैजसश्च तामसश्च यतो भवः मनसश्चेन्द्रियाणां च भूतानां महतामपि २४ स
हस्रशिरसं साक्षाद्यमनंतं प्रचक्षते संकर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयं २५ कर्तृत्वं
करणत्वं च कार्यत्वं चेति लक्षणं शांतघोरविमूढत्वमिति वा स्यादहंकृते २६ वैका
रिकाद्विकुर्वाणान्मनस्तत्वमजायत यत्संकल्पविकल्पाभ्यां वर्तते कामसंभवः २७

रणत्वमिंद्रियरूपेण कार्यत्वं भूतरूपेण शांतत्वादिकं तु तत्कारणगुणत्रयरूपेण मनसस्तूत्पत्ति
पूर्वकं लक्षणमाह द्वाभ्यां २६ संकल्पः चिंतनं विकल्पो विशेषचिंतनं यस्य मनसः संकल्पविक
ल्पाभ्यां कामसंभवो वर्तते इति कामस्य वृत्तिः लक्षणं तेमोक्षानत्व प्रद्युम्नाख्यमूर्तिः तस्य संक
ल्पत्वात्कार्यत्वाभावात् उपास्यरूपमाह स्यानिरुद्धस्योक्तेः २७ शारत्कालेन्दीवरोत्पलवच्छ्यामसा

२८

94A णरूपं

हे सति द्रव्यस्फुरणविज्ञानमिति चित्तवत्कृत्यमुक्तं इंद्रियाणामनुग्रह इति सविकल्पज्ञाने हृषीकाः
णामधीनत्वमिति यदुक्तं तत्र निर्विकल्पकज्ञाने द्रव्यस्फुरणस्यैव प्रपंचः संशयादिः विपर्यासो मिथ्याज्ञा
नं निश्चयः प्रमाणज्ञानं स्वापो निद्रा प्रमाणविपर्ययविकल्पनिद्रास्मृतय इति पातंजलोक्तेः इंद्रियाणा
मुत्पत्तिमाह ३० तैजसानीति साहंकारनानानि ज्ञानेंद्रियाणि वैकारिकत्वे शेकानि द्वयमेवकारः हि
विधान्यपींद्रियाणि तैजसान्येवेत्यन्वयः तत्र हेतुः प्राणस्येति हि यस्मात् प्राणस्य क्रियाशक्तिः

तैजसात्तु विकुर्वाणाद्बुद्धितत्त्वमभूत्सति द्रव्यस्फुरणविज्ञानमिंद्रियाणामनुग्रहः २९ संश
योथ विपर्यासो निश्चयः स्मृतिरेव च स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ३० तैजसा
नींद्रियाण्येव क्रियाज्ञानविभागशः प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ३१ ताम
साच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं तु शब्दगम् ३२

स्य

बुद्धेश्च विज्ञानशक्तिता अतः प्राणस्य तैजसत्वात् तत्क्रियाशक्तिमतामिंद्रियाणां तैजसत्वं तथा बुद्धे
स्तैजसत्वात्तदीयज्ञानशक्तिमतामपींद्रियाणां तैजसत्वमित्यर्थः तन्मात्रोत्पत्तिः सर्वकर्माकाशादिमह
भूतोत्पत्तिं तल्लक्षणं चाह पंचदशभिः ३१ श्रोत्रं तु शब्दगमित्यादिभिर्विषयोत्पत्त्यनंतरं तत्संबंधमात्रे त
णैकथ्यते न तत्पत्तिः प्रागेवोत्पन्नत्वात् शब्दं गच्छति प्राप्नोतीति शब्दगः स्य तल्लक्षणमाह ३२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

95

श्री भाग टी ३

अर्थाश्रयत्वमर्थवाचकत्वं द्रष्टुर्लिंगत्वं कुड्याद्यंतरितस्य वक्तुः ज्ञापकत्वं तदुक्तं लिंगयद्दृष्टस्वरूपयोरिति
नभसस्तन्मात्रत्वं शब्दस्य लक्षणमित्यन्वयः ३३ छिद्रदातृत्वमवकाशदातृत्वं बहिरंतरं व्यवहारास्पदत्वं
बहिरंतरत्वम् प्राणेन्मनः प्राणादीनां धिष्ण्यत्वमाश्रयत्वं नासाग्रादिछिद्ररूपेण एव कार्यमेव लक्षणं वृत्ति
लक्षणमेवमुत्तरत्रापि एकेन श्लोकेन तन्मात्रमहाभूतयोरुत्पत्तिः द्वितीयेन तन्मात्रलक्षणं तृतीये
न महाभूतलक्षणमित्यनुसंधेयं ३४ कालात्कृतस्पर्शस्य संग्रहः सम्यक् ग्रहणं येन त्वगिंद्रियं

अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिंगत्वमेव च तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ३३ भूता
नां छिद्रदातृत्वं बहिरंतरमेव च प्राणेंद्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम् ३४ नभसः श
ब्दतन्मात्रात्कालगत्या विकुर्वतः स्पर्शोऽभवत्ततो वायुस्त्वक्स्पर्शस्य च संग्रहः ३५ मृदुत्वं क
ठिनत्वं च शैत्यमुष्णत्वमेव च एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ३६ चालनं व्यूह
नं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः सर्वेंद्रियाणामात्मत्वं वायोः कर्माभिलक्षणम् ३७ ॥

गत्वात् यद्वा स्पर्शस्य संग्रहो यतो भवतीति शेषः शब्दतन्मात्रादित्यादि तन्मात्राणामुत्तरोत्तरान्वया
र्थमुक्तम् ३५ स्पर्शत्वं स्वरूपलक्षणमित्यर्थः नभस्वतो वायोः तन्मात्रत्वम् ३६ चालनं वृक्षशाखा
देः व्यूहनं मेलनं तृणादेः प्राप्तिः संयोगः द्रव्यस्य गंधवतो घ्राणं प्रति तथा श्रोत्रादिमनः स्पर्शनेश
ति शब्दस्य श्रोत्रं प्रति नेतृत्वे सर्वेंद्रियाणामात्मत्वं प्राणोद्बलकत्वं कर्मणा कार्येणाभिलक्षणं
भावोत्पत्तिः कर्मैवाभिलक्षणमिति भावे ल्युट् विग्रहे त्वकरणे ३७

९१

95A

३८ द्रव्याकृतित्वं द्रव्यस्याकारसमर्पकत्वं गुणता द्रव्योपसर्जनत्वप्रतीतिः शब्दस्पर्शाभ्यां तेषां तेषामेव प्रतीतिः अप्र।
मद्द्रव्यस्याकाशादेरपि स्पर्शेनैव प्रतीतिः रूपस्य तु नैवमिति तस्यार्थविशेष उक्तः व्यक्तिसंस्थात्वं द्रव्यस
स्यामत्रिवेषाः सैव तस्याश्रयस्य द्रव्यपरिणामतया प्रतीतिरित्यर्थः तेजस्त्वं तेजस्त्वमसाधारणत्वं ३९ द्योत
नं प्रकाशनं पचनं चते तुलादेः दाहश्च तद्वत् प्रशनाच पिपासा च तद्वारेण पानमदनं च ४० जिह्वा रसनेन्द्रियं

वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत् समुत्थितं ततस्तेजश्चक्षू रूपोपलम्भनं ३८ द्रव्याकृति।
त्वं गुणता व्यक्तिसंस्थात्वमेव च तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ३९ द्योतनं पचनं पानम
दनं हिममर्दनं तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ४० रूपमात्राद्विकुर्वाणात्तेजसो दैव
चोदितात् रसमात्रमभूत्तस्मादम्भो जिह्वा रसग्रहः ४१ कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा।
भौतिकानां विकारेण रस एको विभिद्यते ४२ क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनं तापा
पनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः ४३ रसमात्राद्विकुर्वाणादम्भसो दैवचोदितात् गन्धमा।
त्रमभूत्तस्मात् पृथ्वी घ्राणस्तु गन्धगः ४४

रसो गृह्यतेऽनयेति रसग्रहा जिह्वा रसग्रहः ततो भवतीति शेषः ४१ कषायादिभेदं वाच्योऽपि द्रव्यं भौ-
तिकानां संसर्गिद्रव्याणां एक एव मधुर एव रसोऽनेकधा भिद्यते स्वरसभेद इत्यर्थः ४२ क्लेदनमार्द्रीक
रणं पिण्डनं मृदादेः पिण्डीकरणं तृप्तिः तृप्तिधातृत्वं प्राणनं जीवनं प्राणो ह्यापोमयः प्राण इति श्रुतेः आप्यायन
मुद्वेलतानिवर्तनं उन्दनं मृदूकरणं मुन्दनमिति पाठे स एवार्थः भूयस्त्वं कूपादाद्रुतस्यापि पुनः पुनरुद्भ

॥ भा० टी० स्कं० ३ ॥

२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कारं भोगमिश्रगंधः पृथ्व्यां जलादीनां हिमत्वादिसंस्कारेण प्रतिनियतिः इंद्रियः सौरभ्यं कर्पूरादेः शांतः घात।
पुष्पादेः उग्रलशुनादेः संसर्गिणा द्रव्यान्तरेण वा विषम्यायुयमेव विभिद्यते स्पर्शो यत्र स्पर्शः ४५ ब्रह्मणोभावे
प्रतिमादिरूपेण साकारता प्रादेशस्थानेन जलादि विलक्षणतया नैरपेक्षेण स्थितिः धारणं जलाद्याधा
रत्वमात्मा काशादीनां विशेषणपरिच्छेदकत्वं सर्वेषां सत्त्वानां प्राणिनां तद्गुणानां च पुस्तकादीनां।
तद्भेदः परिणाम विशेषैः प्रकटीकरणं श्रोत्रादीनां शब्दग्राहकत्वमुक्तं तेषां च लक्षणं तद्वेत्यादि

कारं भूतिसंयोगं प्राप्य शांतोग्रमूढादिभिः पृथक् द्रव्यान्तरवशादेव सूक्ष्माद्येकोपि विभिद्यते ४ ५
भावनं ब्रह्मणः स्थानं धारणं सहिष्णुता सर्वसत्त्वगुणा भेदः पृथिवीवृत्तिलक्षणं ४६ न
भो गुण विशेषो यो यस्य तच्छब्द इत्युच्यते वायोर्गुणविशेषो यो यस्य तत्स्पर्शनं विदुः ४७
तेजो गुणविशेषो यो यस्य तद्रूपमुच्यते अंभोगुणविशेषो यो यस्य तद्रसनं विदुः ४८ भू
मेर्गुणविशेषो यो यस्य सघ्राणमुच्यते पूर्वस्य तद्गुणस्यैव धर्मो यः परस्मिन्समन्वयात् एतेऽवि
शेषा भावानां भूमावेवोपलक्ष्यते ४९ ॥

पंचभिः ४६ नभसो गुणविशेषः शब्दो यस्यार्थो विषयाः गुणविशेषशब्दव्याख्यायां चतुर्भिर्दर्शयति पर।
स्येति ४७ ४८ परस्य कारणस्य धर्माः शब्दादिः परस्मिन् कार्ये वायवादौ कारणान्वयात् दृश्यन्ते य
तो भावानामाकाशादीनां विशेषा गुणाः सर्वेपि शब्दादिः भूमावेवोपलभ्यन्ते च तेषां कारणान्वयात्
जलादिषु यथान्वयमेव न सर्वेः आकाशे शब्द एव यथा भावाद्येकपरवेति एवं कारणोत्पत्तिमुक्त्वा कार्यात्पत्ति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

96A

एतान्यसंहत्यामिलित्वा यदा स्थितानि तदा जगदादिरीश्वरः प्राविशत् संभूतिचेतिः याभ्याम्याभिप्रायेणोक्तं प्र
वेशात्पूर्वं सर्वं पिविवदितनएव ५० प्रत्रविद्धेभ्यः यस्मादंडादसौ विराट्पुरुषउदतिष्ठत् ५१ भगवतोरूपमि
ति पुरुषाभेदाभिप्रायेण तस्मिन् पातालादिभिर्विभागमाह नवभिः ५२ उत्थाय शेरते यस्यां तस्मिन्विहाय तमा
त्मभिन्नेभ्यः

एतान्यसंहत्य यदा महदादीनि सप्त वै कालकर्मगुणोपेतो जगदादिरुपाविशत् ५० ततस्ते
नानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनं उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ५१ एतदण्डं विशे
षाख्यं क्रमवृद्धैर्दशोत्तरैः तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ५२ यत्र लोकवितानोऽयं
रूपं भगवतो हरेः ५२ हिरण्मयादण्डकोशादुत्थाय सलिलेशयात् ५३ तमाविश्य महादे
वो बहुधा निर्बिभेद खं ५३ निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् वाण्या वह्निरथो ना
से प्राणोतो घ्राण एतयोः ५४ घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः तस्मात्सूर्यो व्य
भिद्येतां कर्णौ श्रोत्रं ततो दिशः ५५ ॥

विग्रहाधिष्ठाय महांश्चासौ देवश्च खं छिद्रं ५३ वाण्या सह वह्निरभवत् प्राविशत् नासे निरभिद्येतां प्रा
णेन ऊतः स्यूतः सन् घ्राण एतयोर्नासिकयोरभवदित्यनुषंगः ५४ घ्राणादनंतरं वायुर्घ्राणेन सह इति
विशेषण सर्वेंद्रियेष्वपि द्रष्टव्यं नासिके अभिद्येतां अपूर्वं भिद्येतामिति पादद्वये एकपदार्थः ततो दिशः प्रावि शन् ५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ३

श्रादिशाच्छ्रोत्रेनकेशाः ५८ ५७ स्वराट् इंद्रः हरिर्विष्णुः ५२ अभ्रंनेनातनम् ५५ वुद्ध्यादिश्च हृदयमेवाधिष्ठा।

निर्बिभेदविराजस्त्वग्रोमश्मश्र्वादयस्ततः ततओषधयश्चासन्यस्यांगेनिर्विभिदेततः ५६ रेतः
तस्मादापश्चासन्निरभिद्यतवैगुदं गुदादपानोऽपानाच्चमृत्युर्लोकभयंकरः ५७ हस्तौच
निरभिद्येतांवलंताभ्यांततः स्वराट् पादौचनिरभिद्येतांगतिस्ताभ्यांततोहरिः ५८ नाड्योस्य
निरभिद्यंतताभ्योलोहितमाभृतं नद्यस्ततः समभवन्नुदरंनिरभिद्यते ५९ क्षुत्पिपासेततः
स्यातांसमुद्रस्त्वेतयोरभूत् अथास्यहृदयंभिन्नंहृदयान्मनउत्थितं ६० मनसश्चंद्रमाजातो।
बुद्धिर्बुद्धेर्गिरांपतिः अहंकारस्ततोरुद्रश्चित्तंचैत्यस्ततोभवत् ६१ एतेह्यभ्युत्थितादेवा
नैवास्योत्थापनेशकन् पुनराविविशुःखानितमुत्थापयितुंक्रमात् वह्निर्वाचामुखंभे
जेनोदतिष्ठत्तदाविराट् ६२ अक्षिणीचक्षुषादित्योनोदतिष्ठत्तदाविराट् घ्राणेननासि
केवायुर्नोदतिष्ठत्तदाविराट् ६३ श्रोत्रेणकर्णौचदिशोनो
दतिष्ठत्तदाविराट् त्वचंरोमभिरोषध्योनोदतिष्ठत्त
दाविराट् ६४ ॥

नेगिरांपतिर्बुद्धा ६० चैत्यः क्षेत्रज्ञः अन्वयव्यतिरेकाभ्यांक्षेत्रज्ञस्यविवेकेसर्वेषांपुनःप्रवेशमाह न

= स्कं ३ अ २६ ५०

97-A

६८ विराट्देहस्य बृंहिदं हेहदृष्टांतेन दृष्टांतेन सांख्योक्तकथनस्य प्रयोजनमाह यदेति द्वाभ्यां प्रथमे त्रीपरमे
श्वरे भक्तिः तेनान्यत्र विरक्तिः तयोर्योगप्रवृत्ताधीः एकाग्रं चित्तं तेनाथ तज्ज्ञानेनेन ध्यानगम्यात्मानं देहेत्र ७१
प्रविष्टमात्मनि कार्यकारणसंघातेवाविव आविंतयेत ७० ७१ इति श्रीभावार्थे तृतीये षड्विंशः सप्तविंशे

रेतसा शिश्नमापस्तु नोदतिष्ठत्तदा विराट् गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट् ६४ हस्ताविं
द्रो बलेनैव नोदतिष्ठत्तदा विराट् विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट् ६५ नाड्यो नद्यो लोहिते
ननोदतिष्ठत्तदा विराट् क्षुत्तृड्भ्यामुदरं सिंधुर्नोदतिष्ठत्तदा विराट् ६६ हृदयं मनसा चंद्रो नोदतिष्ठ
त्तदा विराट् बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्तदा विराट् ६७ रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्तदा वि
राट् ६८ चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा विराट् तदैव पुरुषः सलिलादुदतिष्ठत ६९
यथा प्रसुप्तं पुरुषं प्राणेंद्रियमनोधियः प्रभवंति विना येन नोत्थापयितुमोजसा ७० तमस्मि
न्प्रत्यगात्मानं धिया योगप्रवृत्तया भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिंतयेत् ७१ इति भाग
वते तृतीयस्कंधे कापिलेये तत्त्वसमाम्नाये षड्विंशतितमोऽध्यायः २६ श्रीभगवानुवाच
प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् १

ततः सम्यक्त्वं साधनयोगतः पुंप्रकृत्योर्विवेकेन मोक्ष इति निरूप्यते विवेकज्ञानेन मोक्षमुपपा
दयितुं पुरुषस्य स्वरूपतो न प्रकृत्याविवेकतः संसारमत्तुसारयति प्रकृतिस्थोऽपीति त्रिभिः १

98

श्री भाग टी ५८

देहस्थोपिनाज्यतेनलिप्यतेगुणैस्तत्कृतैः सुखदुःखादिभिः निर्गुणत्वादकर्तृत्वे ततोविकारित्वेन तस्मात् २ अनि
र्वृतः अवशःकृतानिसंगकृतैः सदसन्मिश्रयोनिषुदेवतिर्यङ्नरादिषुसंसारपदवींप्राप्नोति ३ ननुतर्हि अपवादस्तदवस्था
त्मसंसृतेः कितन्निवृत्तिर्मिथ्यात्वेनतत्राह यतोविषयध्यानमनर्थहेतुः अतोमनोनिरुन्ध्यादित्याह अतएवेति असतांपथि
इन्द्रियाणांपथिविषयमार्गेतीव्रेणाद्वैतेनविरक्त्याचनीश्चया ५ भक्तिर्विरक्तेरात्मज्ञानेकारणानिवर्णयन्

स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते अहंक्रियाविमूढात्माकर्तास्मीत्यभिमन्यते २ तेनसंसारप
दवीमवशोभ्येत्यनिर्वृतः प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ३ अर्थेह्यविद्यमानेपिसंसृति
र्ननिवर्तते ध्यायतोविषयानस्यस्वप्नेनर्थागमोयथा ४ अतएवशनैश्चित्तंप्रसक्तमसतांपथि
भक्तियोगेनतीव्रेणविरक्त्याचनयेद्वशम् ५ यमादिभिर्योगपथैरभ्यसन्श्रद्धयान्वितः मयिभा
वेनसत्येनमत्कथाश्रवणेनचा ६ सर्वभूतसमत्वेननिर्वैरेणाप्रसंगतः ब्रह्मचर्येणमौनेनस्वध
र्मेणबलीयसा ७ यदृच्छयोपलब्धेनसंतुष्टोमितभुङ्मुनिः विविक्तशरणःशान्तोमैत्रःकरुण
आत्मवान् ८ ॥

ज्ञानेनमोक्षप्रकारमाह षड्भिर्यमादिभिर्योगमार्गैश्चित्तमभ्यसन्पुनःपुनः एकाग्रीकुर्वन् आत्मानमुप
लभ्यसर्वानुस्यूतमद्वयंपरमात्मानंप्रतिपद्यत इतिषष्ठेनान्वयः सत्येननिष्कपटेनभावेनप्रेम्णा ६
अप्रसंगतः असंगत्यागेनबलीयसा ईश्वरार्पितेन ७ विविक्तशरणः एकान्तवासी ८ ॥ ॥ ५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रमदाग्रहं ममतां प्रकृतेः पुरुषस्य च दृष्टृत्वं येन तेन ज्ञानेन ९ निवृत्ता निद्रावस्था नाम निद्राग्र-
हादीनि यस्य सः अत एव हरीभूतम् अदर्शनं यस्य आत्मना अहंकारावच्छिन्नेन आत्मानं शुद्धं उपल-
भ्य एकस्यैवावच्छेदानवच्छेदाभ्यां कारणकार्यत्वे दृष्टान्तमाह चक्षुषा चक्षुरवच्छिन्नेनार्केणानवच्छिन्न-
मर्कमिव एवमात्मदृक् शुद्धमात्मानं पश्यन् १० मुक्तलिङ्गेन निरूपयितुं कल्पितं मिथ्याभूतं अहं-
कारं सदाभासं सद्रूपेणाभासमानं त्यजन् प्राप्नोति शुद्धजीवस्वरूपादिशेषमाह सतः कारणस्य अ-

मात्रं बंधश्च देहेऽस्मिन्नकर्तृत्वमसदाग्रहं ज्ञानेन दृष्टृत्वेन प्रकृतेः पुरुषस्य च ९ निवृत्तगुण-
वस्थानो हरीभूतात्मदर्शनः उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक् १० मुक्तलिङ्ग-
सदाभासमसति प्रतिपद्यते सतो बंधुमसत्त्वतः सर्वानुस्यूतमद्वयं ११ यथा जलस्थ आ-
भासः स्थलस्थेनावदृश्यते स्वाभासेन तथा सूर्यो जलस्थेन दिवि स्थितः १२ एवं त्रिवृदहं-
कारो भूतेन्द्रियमनोमयैः स्वाभासैर्लक्षितोऽनेन सदाभासेन सत्यदृक् १३

तस्य बंधुमधिष्ठानं प्रमतः कार्यस्य च ... सर्वेषु कार्यकारणेषु अनुस्यूतं अ-
द्वयं परिपूर्णं अहंकारोपहितेन शुद्धं ब्रह्म प्रतिपद्यते सदृष्टान्तमाह ११ जले स्थित आभासः सूर्यप्र-
तिबिम्बो यदा गृहान्तर्भित्तिभिर्भासमानः स्फुरति तदा गृहकोणस्थितैः पुरुषैर्भित्त्यादौ स्थले स्थितेन स्वाभा-
सेन सूर्यप्रतिबिम्बेन यथा प्रथमं जलस्थ आभासोऽवदृश्यते लक्ष्यते गगनस्थस्य गृहमध्यप्रति-
बिम्बायोगात् तेनाभासेन तथा तद्रूपश्चावस्थितः यथा च जलस्थेन दिवि स्थितः सूर्यो लक्ष्यते १२ एवं त्रि-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भार
टी
२२

99

द्रियमनोभिरवछिन्नैः स्वाभासैरात्मप्रतिबिंबैः त्रिगुणोहंकारैः सतोन्नलणाभासोयस्मिन्न तेनरूपे
णालक्षितः प्रहंकारस्याभासविनाविषयाभासानुसत्तैः प्रतेनवाहंकारेणासदाभासवतासमहंकु
परमार्थतस्निरूपमात्मानलक्षणास्मर्थः १२ इदानीसुषुप्तिसाक्षित्वेनप्रज्ञात्मप्रतिपत्तिमनुभवतो
मनुदर्शयतित्रिभिः भूतादिषुप्रसतिप्रसन्नल्पमूर्च्छाकृते नि इयालीनेषुसत्स्वपकाचनता
विनिद्रोनिरहंक्रियः तमात्मानंप्रतिपद्यतेरतिहतीयेनान्वयः १४ ननुयदितत्रविनिद्रोसावस्तितर्हि
जाग्रत्स्वप्नयोरिवस्फुटः किंनावभासतेतत्राह पूर्वसस्पष्टानोदृष्टान्तेनसविकल्पतयास्फुटम्

भूतस्थेन्द्रियमनोबुद्ध्यादिष्विह निद्रया लीनेष्वसतियस्तत्र विनिद्रोनिरहंक्रियः १४
मन्यमानस्तदात्मानमनष्टोनष्टवन्मृषा नष्टोहंकरणोद्रष्टानष्टवित्तश्चवालकः १५ प्र
वेप्रत्यवमृष्यामावात्मानप्रतिपद्यते साहंकारस्यद्रव्यस्ययोवस्थानमनुग्रहः १६ ॥

तीतः सुषुप्तौतुभूतादेरहंकारविषयस्यलीनत्वात् तद्विषयेदंकारेननष्टसनिस्वयमनष्टोपिमृषैवा
त्मानंनष्टवन्मन्यतेयः प्रमस्यनाशाप्रमस्यनष्टत्वेदृष्टान्तः नष्टवित्तोयथाप्रातरोविवशोन
ष्टवद्गवतीत्यर्थः ननुसुषुप्तौनकिंचिदनुभूयतेनैवंसकलसहमस्वप्नेनकिंचिदवेदिषमितिविशे
षज्ञानेविनाकेवलस्यात्मनः प्रतिसंधानेसाहंकारस्यप्रतीतेः कथंनिरहंक्रियत्वंतत्राह साहंका
रस्यद्रव्यस्यकार्यकारणात्मस्थानस्यानुग्रहः प्रकाशनमवस्थानंचद्वाविशेषणेनयाहंकारेण
स्याविदृष्टपत्वाच्च तद्रष्टात्मातव्यतिरिक्तः तमात्मानमित्यन्वयः भक्तिविरक्तिभ्यांसत्यपिविवेकेप
ज्ञानिपुरुषयोः परस्यावात्मायाथाभावात्कथंमुक्तिरितिपृच्छतिप्रकृतमितिचत्वर्भिः १६ ॥ २२

व्यतिरेकाभावमात्रे दृष्टान्तः १७ यथा व्यतिरेकतो भावः सत्ता नास्ति गंधस्य कदाचिदपि तत्पृथग्दर्शनात् दृ
ष्टान्तोऽनेकस्य प्रमाणामि बुद्धेः प्रकृतेः पुरुषस्य परस्य चेतनः किमत आह १८ ये गुणाश्रया बन्धयोग्यास्ते तेषु
प्रकृतेर्गुणेषु सत्सु पुरुषस्य कैवल्यं कथमत एव क्वाचित्कनिवृत्तप्रायस्यापि संसारभयस्य पुनरुद्भवो दृ।
ष्टोऽत इत्याह क्वचिदिति २० न प्रकृतिसंबंधमात्रं बन्धहेतुः किं तु गुणाभिमानस्तस्मात्किं तन्निवृत्तौ सा।

देवहूतिरुवाच पुरुषं प्रकृतिर्ब्रह्मन्न विमुंचति कर्हिचित् अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः
प्रभो १७ यथा गंधस्य भूमेश्च न भावो व्यतिरेकतः अपां रसस्य च यथा तथा बुद्धेः परस्य च १८ अ
कर्तुः कर्मबंधोऽयं पुरुषस्य यदाश्रयः गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथं १९ क्वचि
त्तत्त्वावमर्शेन निवृत्तं भयमुल्बणं अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते २० श्रीभगवानुवा
च अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना। तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरम्
२१ ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा। तपोयुक्तेन योगेन ती
व्रेणात्मसमाधिना। २२

त्यां मोक्षो भवतीत्येकविशुद्धस्य साधनवैराग्यादीन्यभिप्रेत्य साधनानि श्रयेक कथयन्नाह द्वाभ्यामिति त्रि
भिः निमित्तं फलं तेन रहितं निमित्तं प्रवर्तकं यस्मिन् निष्कामेण धर्मेण अमलात्मना निर्मलेन मनसा श्रुते
न कथाश्रवणेन संभृतया पुष्टया २१ दह्यमानाभिभूयमाना तिरोहिता भवति एवं च सति पुरु।
षो नालीत्याह २३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

100

भुक्तो भोगो यस्या निमित्तप्रः सदा दृष्टो दोषो यस्याः प्रलयपर्यन्तं क्रामतीई स्वस्या परं ते च स्य स्वे माहि।
त्विस्थितस्य स्वानेदं प्रागस्या विवेकावस्थायामनर्थहेतुरपि विवेकानंतरं न भवतीति दृष्टांतमाह द्वा।
भ्यां २४ यस्वापः स्वप्नो बहूनर्थान् विभर्ति प्रसाति बुद्धस्य सैष्का रवशेन स्मरन्नपि २५ उपसंहरति त्रि।
भिः २६ बहूनि जन्मानि यस्मिन् काले २७ प्रतिबुद्धार्थो विदितात्मतत्त्वः कैवल्यायैव स्वस्यानेदं हाद्य।

प्रकृतिः पुरुषस्यैवं दृश्यमानाहमिति शो तिरोभवेन्नीशानकैरश्वर्यानि निश्चिवार्थाणि २८ भुक्तभोगाप
वित्यक्तापदृष्टदोषावनित्यशः नेयस्स्याशुभं धत्ते स्वमाहितास्थिरस्यितस्य च २९ यथा हि प्रतिबुद्धस्य
यस्वापो बहूनर्थभृत् सपदप्रतिबुद्धस्य नैवमाहात्म्यकल्पते ३० एवं दितत्त्वस्य प्रकृतिमपि
मानम् पुष्यतो नाम कुरुत प्राणात्मारामस्य कर्हिचित् ३१ यदेवमध्यात्मरतः कालेन बहुजन्म
ना सर्वत्र जातवैराग्यं आब्रह्मभुवनान्मुनिः ३२ मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा निः
श्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयं ३३ प्राप्नोति तेनसाधीरः स्वदृशाच्छिन्नसंशयः यदृ
त्वा न निवर्तेत योगी लिंगाद्विनिर्गमे ३४ यदा न योगोपचितास्य चेतो मायासु सिद्धस्य विष
ज्जतेव च प्रकस्य हेतुवयमे गतिः स्यादात्यन्तिकी यत्र न मत्युहासः ३५ ॥

तिरिक्तं स्वरूपं मदाश्रयं निःश्रेयसं निवृत्तिं प्राप्नोति २९ स्वदृशा मज्ज्ञानेन नाच्छिन्नाः संशयास्तिस्य
त्या नानित्यस्या लिंगाद्विनिर्गमे लिंगशरीरनाशे संनिकर्षः ३१ तदा तु प्रागिमा दे सिद्धयः प्रलना
यरूपा भवंति तास्तु योगेनोपचितास्य मम महात्म्यं च न योगादन्यो हेतुर्यासां ताः स्य यदा सिद्धस्य चेतो न
विषज्जते च प्रवद हेमातः प्रत्ययनदप्रं नमंतिकान्तायेह मा स्तेन संवपिनीयत्र यस्य गतेर्मृत्योः हीसा न।

१००

100-A

इति श्रीभावार्थदीपिकायां तृतीये सप्तविंशः २७ अष्टाविंशे ततोऽष्टांगयोगेन ध्यानगोचरं विना सर्वोपाधिवि-
निर्मुक्तं स्वरूपज्ञानमीर्यते भक्तिसंक्षेपतः प्रोक्ता सांख्यमाख्याय विस्तृतम् अथाहैवं सबीजयोगमष्टांगं क-
पिलो मुनिः १ सबीजस्य सालंबनस्य प्रसन्नं सत् तत्र यमनियमानाह त्रिभिरर्धाधिकैः २
ग्राम्यः वैषयिकधर्मः तस्मान्निवृत्तिः मितं च तन्मेध्यं शुद्धं च तस्यादनं नात्यशितेनाम द्वौ भागौ पूरयेदन्नै-

इति श्रीभागवते तृतीयस्कंधे कापिलेये सप्तविंशोऽध्यायः २७ श्रीभगवानुवाच योगस्य लक्ष-
णं वक्ष्ये सबीजस्य नृपात्मजे मनो येनैव विधिना प्रसन्नं याति सत्पथं १ स्वधर्माचरणं शक्त्या वि-
धर्माच्च निवर्त्तनं दैवाल्लब्धेन संतोष आत्मविच्चरणार्चनं २ ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मे र-
तिस्तथा मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनम् ३ अहिंसा सत्यमस्तेयं यावदर्थपरि-
ग्रहः ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनम् ४ मौनं सदासनजयः स्थैर्यं प्राणजयः श-
नैः प्रत्याहारश्चेंद्रियाणां विषयान्मनसा हृदि ५ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम्
वैकुंठलीलाभिध्यानं समाधानं तथा-
त्मनः ६

स्तोयेनैकं प्रपूरयेत् मारुतस्य प्रचारार्थं चतुर्थमवशेषयेदिति स्मृतिप्रसिद्धं विविक्तं विजनं देशम्।
निर्बाधं तस्य स्थानस्य सेवनम् ३ यावदर्थः प्रयोजनं तावन्मात्रस्य परिग्रहः आसनादीन्योगांगान्याह
त्रिभिः ४ सदासनस्य जयेन स्थैर्यम् ५ स्वधिष्ण्यानां प्राणस्थानानां मूलाधारादीनां मध्ये एक-
स्मिन् देशे मनसा सह प्राणस्य धारणं आत्मनो मनसः समाधानमात्माकारता ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अन्यैश्चव्रतदानादिभिःपथिभिःकषायैर्गमनादीनिप्रपंचयतिशुचावित्यादिनायावत्समाप्तिः १ आसनेकुशाजिनचैलो।
त्तरम् प्रतिष्ठाप्यस्वस्तिकासनेनवासमभ्यसेत् प्राणमितिशेषः ऋजुत्वेचोन्नतदायपादाग्रेजानुमध्यगे योगिनो।
यदवस्थानंस्वस्तिकंतद्विदुर्बुधाः २ वामस्यवायोरंतःप्रवेशनेपूरकः प्रवेशनेरेचकः प्रवेशितस्यधारणेकुंभ
कः धृतस्यबहिःनिस्सारणंरेचकः प्रतिकूलेनवेत्युक्तं पूरककुंभकैः यद्वाइडयापूरणंपिंगलयारेचनंपिंगल

एतैरन्यैश्चपथिभिर्मनोदुष्टमसत्पथं बुध्यायुंजीतशनकैः जितप्राणोह्यतंद्रितः १ शुचौदेशेप्र।
तिष्ठाप्यविजितासनआसनम् तस्मिन्स्वस्तिसमासीनऋजुकायःसमभ्यसेत् २ प्राणस्यशो।
धयेन्मार्गंपूरकुंभकरेचकैः प्रतिकूलेनवाचित्तंयथास्थिरमचंचलं ३ मनोऽचिरात्स्याद्वि।
रजंजितश्वासस्ययोगिनः वाय्वग्निभ्यांयथालोहंध्मातंत्यजतिवैमलं ४ प्राणायामैर्दहेद्दो।
षान्धारणाभिश्चकिल्बिषान् प्रत्याहारेणसंसर्गान्
ध्यानेनानीश्वरान्गुणान् ॥
॥ ५

यापूरणंइडयारेचनमित्येवंप्रतिकूलेनवाशब्दश्चार्थेस्थिरंसत्पुनरपिचंचलंयथानभवतितथाशोध
येत् ३ ध्मातंसंतप्तमित्यर्थः लोहंसुवर्णंयथामलंत्यजतितथामलंत्यजतितथामनोविरजंस्यात्
ततःचंचलत्वंस्यादितिभावः प्राणायामादीनांसमाधौपहारतामाह ४ दोषान्वातपित्तश्लेष्मादीन्
संसर्गान् विषयसंगान् अनीश्वरान्रागादीन् ॥ ॥

101-A

वायुनास्वहृमनसः स्थिरीकरणं धारणा स्थिरस्य वृत्तिसंहतिर्ध्यानं वृत्तिनिरोधः समाधिरिति भेदः स्वसमा
हितं स्थिरं ज्ञात्वा काष्ठां कलां मूर्तिमित्यर्थः स्वनासाग्रावलोकनेन यस्य पतत्त्वलयविक्षेपयोः परिहाराय।
ध्येयं रूपमाह सप्तभिः १२ प्रसन्नेति वदनाम्भोजं यस्य तं ध्यायेदिति षष्ठेनान्वयः पद्मगर्भवदरुणे ईक्षणे
नेत्रे यस्य नीलोत्पलश्यामं १३ लसत्पंकजकिंजल्कवत्पीतकौशेयवाससी यस्य भ्राजत्कौस्तुभे

यदा मनः स्वं विरजं योगिनः स्वसमाहितं काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः १२
प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणं नीलोत्पलदलश्यामं शंखचक्रगदाधरम् १३ लस
त्पंकजकिंजल्कपीतकौशेयवाससं श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं १४ म
त्तद्विरेफकलया परीतं वनमालया परार्ध्यहारवलयकिरीटांगदभूषणं १५ कांचीगु
णोल्लसच्छ्रोणिं हृदयाम्भोजविष्टरं दर्शनीयतमं शान्तं मनोनयनवर्धनं १६ अपीच्यद
र्शनं शश्वत्सर्वलोकनमस्कृतं स्थितं वयसि कैशोरे भक्तानुग्रहका
तरं १७ ॥

न संश्लिष्टा कंधरा यस्य १४ मत्तद्विरेफाणां कलो मधुरो ध्वनिर्यस्यां तया वनमालया परार्ध्यानि महामूल्या
नि हारादीनि यस्य कांचीगुणेनोल्लसन्ती श्रोणिर्यस्य भक्तानां हृदयाम्भोजमेवासनं यस्य भ
क्तानां मनोनयनानि वर्धयति दर्शयल्लोचयति १६ अपीच्यमतिसुंदरं भाति विषये दर्शनं यस्य कैशो
रे तारुण्यवयसि स्थितं भक्तानामनुग्रहे कातरं व्यग्रम् १७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
१०२

कीर्तन्यंकीर्तनार्हंतीर्थंयशोयस्यपुण्यश्लोकावलिप्रख्यस्वाभ्लेषांयशस्करं समग्राण्यंगानियस्मिन्
नच्यवतेमापश्यानितनपश्येत् १८ प्रेक्षणीयमीहितंलीलायस्यतंदेवंसमग्रध्यानमुक्त्वाएकैकावयव
ध्यानमाह १९ तस्मिन्लब्धपदंस्थितिः येनतच्चित्तंविशेषणात्तस्यलक्ष्मीकान्त्याएकत्रएकस्मिन्नंगेदृष्ट्या
र्थः तदेवपादादिक्रमेणाहत्रयोदशभिः २० सञ्चकुचितयेनपादनखैरवाप्मकानिवज्रादीनिलां

कीर्तन्यतीर्थयशसंपुण्यश्लोकयशस्करं ध्यायेद्देवंसमग्रांगंयावन्नच्यवतेमनः १८ स्थितं
व्रजंतमासीनंशयानंवागुहाशयं प्रेक्षणीयेहितंध्यायेत्शुद्धभावेनचेतसा १९ तस्मिंल्लब्ध
पदंचित्तंसर्वावयवसंस्थितं विलक्ष्यैकत्रसंयुज्यादंगेभगवतोमुनिः २० संचिंतयेद्भग
वतश्चरणारविंदंवज्रांकुशध्वजसरोरुहलांछनाढ्यंउत्तुंगरक्तविलसन्नखचक्रवालज्यो
त्स्नाभिराहतमहद्धृदयांधकारम् २१ यच्छौचनिःसृतसरित्प्रवरोदकेनतीर्थेनमूर्ध्न्यधिकृ
तेनशिवःशिवोऽभूत् ध्यातुर्मनःशमलशैलनिसृष्टवज्रंध्यायेच्चिरंभगवतश्चरणारविंद

मू २२

ध्वजादीनितैराढ्यंयुक्तंउत्तुंगारक्ताविलसंतोनखाः तेषांचक्रवालंमंडलंयस्यतस्यज्योत्स्नाभिराहतो
महद्धृदयांधकारोयेनअत्रसर्वमुपादेयविशेषणंध्येयत्वेनैवोच्यतेकिंच २१ यस्यशौचेनक्षा
लनेननिःसृतायाःसरित्प्रवरायागंगायाउदकेनतीर्थेनसंसारतारकेनमूर्ध्न्यधिकृतेनधृतेनशिवोऽपि
शिवोऽभूत् प्रत्यधिकंस्वशिवसाम्यमर्थः ध्यातुर्मनसियःशमलशैलःपापपर्वतःतस्मिन्निसृष्टंप्रेरि

तंवज्रमिवयत् यद्वाशमलशैलेनिसृष्टंस्वतोऽकृतरूपंवज्रंयेनतत् २२

१०२

102-A

विभोर्नाभुहृदयं तन्मयं तं तेजोराडयं प्रविलसद्विधानुवृंदलक्ष्मणेन नन्यालन्यासेत्यालिंगितस्य श्रीवाजयेणासं
सेवितं संसारितनमिवृषतीतेवास्यंतिप्रभवस्यतिहृदिकुर्यात ध्यायेत २२ स्फुरन्मस्पभुजयोः स्कंधयोः प्रपि
ड्यमिंडाजमोवलस्यनिधीप्राधारो श्रतस्मिकाञ्जसमवक्रोत्याविभासमानोव्यालंबिप्राशुलफलेनवमानंथ
पन्यांतोवस्त्रावासः तस्मिन्वर्तमानोय कांचीकलापः तेनपरिरंभः संश्लेषोविधतेयस्य तहिभोः नितंबं।

नाभुहृदयं जलननेलावनपाजननन्यालन्यालविलसस्फुरवंदितयभविधानः ऊर्वोर्निधायकरपद्म
वराविषयतेलालितेहृदिविभोरभवस्यकुर्यात २३ ऊरूस्तपर्णभुजयोरधिशोभमानावोत्ता।
धीशततसिकाञ्जसमावभासौ व्यालंबिपीतवरवाससिवर्तमानं कांचीकलापपरिरंभिनि।
तंबिंबिम २४ नाभिहृदंभुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मं
व्युढं हरिएमनिहृषसस्तनयोरमुष्यध्यायेत द्वयंविशदहारमयूखगौरम २५

विंबं हृदिकुर्यात इतिसर्वेणोवान्वयः २४ अमुष्यहरेः नाभिहृदं ध्यायेत कथंभूतं भुवनानां कोशस्य सम्
हस्य गुहोदरपिष्ठानेयस्युदरंतत्रस्थितेयत्रनाभिहृदं आत्मयोनेः ब्रह्मणोधिषणाधिष्ण्यं अखिललोकात्म
कं पद्मंयस्मिन्न्युढं स्थितं तनयोः हरिएमनिहृषयोमरकतमणिश्रेष्ठाविवयोस्तनोतनयोद्वयं ध्यायेत विशद
हारमणीमयूखेः गौरं स्वेतम २५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ९३

स्यपभस्यश्चेष्टस्यमहाविभूतेः महालक्ष्म्याः पृथिव्यामेस्थानेवक्षः कं देवमनसिकृत्यानकथंभूतं कंठं कौस्तु
भमणिमौभूषणाधेयभूतः तस्याधिकभूषणाय यः पयोजनेयस्यकौस्तुभमणिमेवस्वयमलंकृतवानमित्यर्थः
पुंसांमनोनेत्रादृष्टमेणाचस्मिनेनयनानांनिर्वृतिमादधानमित्युभयोर्विशेषणं २५ निर्णिक्तानिउज्वलीकृ
तानिबहूवलयानियमहान्तियेषुप्रथिम्नालोकपालायेषुइदृशानांचर्केनसमस्तेनेशस्यकरसरो।

वक्षोधिवासमृषभस्यमहाविभूतेःपुंसांमनोनयननिर्वृतिमादधाने कंठंचकौस्तुभमणेरधिभूष
णार्थंकुर्यान्मनस्यखिललोकनमस्कृतस्य २६ बाहूंश्चमंदरगिरेःपरिवर्तनेननिर्णिक्तबा
हुवलयानधिलोकपालान् संचिंतयेद्दशशतारमसह्यतेजःशंखंचतत्करसरोरुहराजहं
सं २७ कौमोदकींभगवतोदयितांस्मरेतदिग्धामरातिभटशोणितकर्दमेन मालांमधु
व्रतवरूथगिरोपघुष्टांचैत्यस्यतत्वममलंमणिमस्यकंठे २८ भृत्यानुकंपितधियेहगृही
तमूर्तेः संचिंतयेद्भगवतोवदनारविंदं यद्विस्फुरन्मकरकुंडलवल्गितेनविद्योतितामल
कपोलमुदारनासं २९

करहेराजहंसमिव २७ पुरानन्यायेभटायोद्धारः तेषांशोणितमेवकर्दमस्तेनदिग्धांलिप्तांयस्यकंठेमालां
मणिंचस्मरेत मधुव्रतानांवरूथस्यगिरोपघुष्टांनादितांचैतस्यजीवस्यतत्वंतेनउक्तं वैत्सवे आत्मानमस्य
जगतोनिर्लेपमगुणममलं विभर्तिकौस्तुभमणिस्वरूपंभगवान्हरिरिति २८ भृत्येषुअनुकंपिताधी
रात्माययागृहीतामूर्तिर्येनतस्यस्फुरतीयेमकरकुंडलेतयोर्वल्गितेनप्रवल्गनेनविद्योतितौ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यच्छ्रियस्तया भूत्या शोभया अलिभिः परिसेव्यमानं मीनद्वयाश्रयं श्रीनिकेतनं पद्मं अधिक्षिपत् दिप हर्तृ तेन तत् ध्या
येत् तत्र कुन्तलैरेव अलीनामधिक्षेपः नेत्रद्वयेन मीनद्वयस्येति द्रष्टव्यं मनोमयं नेत्रे यस्मिन् उल्लसन्तौ भ्रुवौ
यस्मिन् मनोमयं मनसा आविर्भवत् ३० कृपया अधिकमित्यर्थः प्रदिश्यमानं स्निग्धं यत्स्मितं तेनानुगुणि
तं विपुलः प्रसादो यस्मिन् गुहायां हृदि ३१ अवनता ये अखिललोकाः तेषां तीव्रशोकेन यान्यश्रूणि तेषां सा
गरं विशोषयति तथा हरेर्हासं प्रसन्नतरं भ्रूमण्डलं च ध्यायेत कथंभूतं निजमायया मकरध्वजस्यापि सं

यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्या स्वया कुटिलकुन्तलवृन्दजुष्टं मीनद्वयाश्रयमधिक्षिप
दब्जनेत्रं ध्यायेन्मनोमयमतन्द्रित उल्लसद्भ्रु ३० तस्यावलोकमधिकं कृपयातिघोरतापत्रयोप
शमनाय निसृष्टमक्ष्णोः स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विपुलभावनया गुहा
यां ३१ हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारं संमोहनाय रचितं
बहुलाधरोष्ठभासारुणायिततनुद्विजकुन्दपंक्ति ध्यायेत्स्वदेहकुहरेऽवसितस्य विष्णोर्भक्त्यार्द्र
यार्पितमनाः न पृथग्दिदृक्षेत ३३ ॥ निजमाययास्य भ्रूमण्डलं मुनिकृते मकरध्वजस्य ३२ ध्यानाय नं प्रहसितं

मोहनाय रचितं मुनिकृते मुनीनां मुखं कायाय मुनीनां संमोहने प्रवृत्तं कामस्य संमोहयितुमित्यर्थः मदहा
सध्यानं मुक्त्वा भ्रूदर्शनध्यानं स्यात् ३२ प्रहसितमुच्चैर्हसितं ध्यायेत कीदृशं ध्यानायनं अतिसूक्ष्मतया
प्रयत्नं विनैव ध्यानस्य विषयभूतं सौन्दर्यं सेवा बहुलया अधिकतया अधरोष्ठस्य भासा कान्त्या अरुणीभूतास्तव
नवः सूक्ष्मा द्विजा एव कुन्दमकुलानि तेषां पंक्तिः स्फुरति यस्मिन् हृदयावकाशे अवसितस्य सञ्जातस्य विष्णोः
प्रेमरसार्द्रया भक्त्या तस्मिन्नेवार्पितमनाः सन् पृथक् न किंचिद् द्रष्टुमिच्छेत अर्पितं न विचालयेदित्यर्थः स

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
९४

ऽनिर्वीजः सवीजश्चेति योगो द्विविधः तत्र निर्वीजयोगे यतो यतो निश्चरति मनश्चञ्चलमस्थिरं तत
स्ततो नियम्यैतदात्मन्येव वशं नयेदिति तेनोक्तमार्गेण क्रियमाणोपि दुष्करः समाधिः सवीजो
त्वसुकरः न चेह हि परमानंदमूर्तौ ध्यायमाने यत्न एव चित्तोपरमो भवति यदुक्तं हृत्स्थस्त्वं नो हृत
प्राणायामक्रियाभिश्चित्तकोपनिगृह्णन्मणवोत्र युक्तेश्वरत्नियमनः सपदोपमेति मनः योगस्य लक्षणं वक्ष्ये सवीज
स्यैति तदेवाह यत्नमिह तं दर्शयति एवं ध्यानाभ्यासेन प्रतिलब्धो भावः प्रेम येन यया भक्त्या द्रवत् हृ
दयश्च सः प्रमोदाद् हृष्टानि पुलकानि यस्य सः औत्कण्ठ्यबाष्पकलया च मुहुः अर्द्यमानः आनंदसंप्लवे
निमज्जमानः ईश्वरग्रहणसमर्थं भगवतो ग्रहणे बडिशं मत्स्यवेधनमिवाङ्कुशं तच्चित्तमपि श्रेयो हित्वा शनैस्त्यजति

एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात्। औत्कण्ठ्यबाष्पक
लया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते ३४ मुक्ताश्रयं यर्हि निर्विषयं विर
क्तं निर्वाणमृच्छति मनः सहसा यथार्चिः आत्मानमत्र पुरुषोऽव्यवधानमेकमन्वीक्षते प्र
तिनिवृत्तगुणप्रवाहः ३५

यत्नः ३४ यर्हि यदैवं निर्विषयं भवति तदैव शिथिलप्रयत्नो भवतीत्याह
मुक्ताश्रयं च ध्येयसंबंधं विना ध्यानस्यैवास्यासंभवात् न च पूर्ववच्छब्दादिविषयः स्यात् यतस्तत्र वि
रक्तं परमानंदानुभवेनातो निर्वाणं लयमृच्छति वृत्तिशून्यतां यात्यपरिसमाप्तज्वाला कारेणाय विस्मृति
रुदाहरणं यथार्चिर्ज्वालाग्रप्रायाविषयापगमे प्रशान्ता तिरोभवति इति तदेवं मनस उपशमोत्र पुरुषो व्यवधाने धा
त्र्येय विभागशून्यमेकमखण्डमात्मानमन्वीक्षते अत्र हेतुः प्रतिनिवृत्तोपगतः गुणप्रवाहो दे
हाद्युपाधिर्यस्य न चास्य मोक्षोत्थितस्य पुनः संसरणं स्यात् ३५ ॥ ९४

104-A

सोऽपि स एव पुरुषः तस्मिन्महिम्नि स्वरूपे अवसितः अवसाने निष्ठां प्राप्तः कया मनसो निवृत्त्या चरमया
विद्यावह्नितयेति स्वभ्रमाद्विशेषः तत्रत्याविद्यास्ति न विदांनी अत्रहेतुः एतया योगाभ्यासकृतयेत्यर्थः
नन्वेवमपि सुखदुःखयोरात्मधर्मत्वेन कुतो ब्रह्मलेकोऽनत्राह दुःखयोस्तु सुखदुःखयोस्तु सुखदुःखयो
हेतुत्वं भोक्तृत्वं यत्पूर्वमासीत् तदप्यसति अविद्याकृते कर्तरि अहंकारे विधत्ते तन्निष्ठमेव पश्यती
त्यर्थः यत उपलब्धपरात्मकाष्ठः अपरोक्षीकृतात्मतत्त्वः तस्य जीवन्मुक्तिमाह द्वाभ्यां ३६ चरमतकं।

सोऽप्येतया चरमया मनसो निवृत्त्या तस्मिन्महिम्न्यवसितः सुखदुःख
बाह्ये हेतुत्वमप्यसति कर्तरि दुःखयोर्यत्स्वात्मन्विधत्त उपलब्धपरा
त्मकाष्ठः ३६ देहं च तं न चरमः स्थितमुत्थितं वा सिद्धो विपश्य
ति यतोऽध्यगमत्स्वरूपं दैवादुपेतमथ दैववशादपेतं वासो य
था परिकृतं मदिरामदांधः
३७

त्त्वज्ञः सिद्धो देहमपि न विपश्यति कुतः सुखदुःखे आसनादुत्थितं उत्थाय तत्रैवास्थितं तत्रस्थानांत
तो दैववशात्पुनरप्युपेतं वा न विपश्यति यतः स्वरूपं प्राप्तः यतो देहात्स्वरूपमध्यगमत् तं देहमिति
वासनातोऽप्यनुसंधानेऽदृष्टांतः वासः परिकृतं कटितटे परिवेष्टितं स्थितं गतं वा मदिरामदे॰
नांधो यथा न पश्यति ननु देहस्य प्रवृत्तिनिवृत्तौ जीवनं वा कथं तत्राह ३७ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

105

श्री भाग टी ३ १०५

देहं पूर्वसंस्कारः तद्वशेन गच्छतु यावत्स्वारंभकं कर्मास्ति तावत्प्रतिसमीक्षते जीवत्येव सासुः सेंद्रियः ननु
तर्हि तस्मिन्पुनः स्नेहः स्यात्तत्राह तं देहं सप्रपंचं देहादिवत्प्रपंचं पुत्रादिसहितं पुनर्न भजते अहं ममेति
नाभिमन्यते यतः आरूढः प्राप्तः समाधिपर्यंतो योगो येन अतएव प्रतिबुद्धं वस्तु आत्मतत्त्वं येन सः प्रतिबोध
प्रकारमाह षड्भिः ३८ प्रतिविम्बवत्प्रमादात्मत्वेनाभिमतादपि पुत्रादेः मर्त्यः पित्रादिः पुरुषो देहादेर्द्रष्टा
पृथगेव स्यात् नात्मभावेपि भेदं सदृष्टांतमाह ३९ यथोल्मुकादिदानीं ज्वलतः काष्ठात् स्वसंभवादग्नेः स

देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधिरूढसमा
धियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ३८ यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्यः प्रतीयते अप्या
त्मत्वेनाभिमताद्देहादेः पुरुषस्तथा ३९ यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वापि स्वसंभवात् अ
प्यात्मत्वेनाभिमताद्यथाग्निः पृथगुल्मुकात् ४० भूतेंद्रियांतःकरणात्प्रधानाज्जीवसंज्ञितात्
आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः ४१ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ईक्षे
तानन्यभावेन भूतेष्विव तदात्मतां ४२

॥ ॥

भूतात् आत्मत्वेनाग्नेः स्वरूपत्वेनाभिमतादपि अत्यंतं विवेकिना हि धूमस्याप्यग्न्यभिमानोस्ति उल्मु
कात्पूर्वं सिद्धोपि बुद्ध्यादेः प्रकाशकश्चाग्निः पृथगेव ४० भूतादेः दृष्टांतेभ्यः पृथक्कृतस्सर्वस्मादपि जीवसं
ज्ञितात् पृथक्कृत्वात्मसंज्ञितः तथा प्रधानादपि तत्प्रवर्तको भगवान् पृथगित्यर्थः उपाधितो विवेकमु
क्त्वा तस्यैक्यमाह ४१ भूतेषु च तद्विधेषु तदात्मतां महात्मतां परमभेदस्यौपाधिकत्वात् दृष्टांते

= ३ = टी १०५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

105-A

६

स्वयोनिषु काष्ठेषु ज्योतिरग्निः गुणवैषम्यात् दीर्घह्रस्वादिभेदात् प्रकृतौ देहे ४४ स्वांशस्य बंधहेतुं दैवीं विष्ण
विष्णोः शक्तिं पराभाव्य तत्स्वरूपेणावतिष्ठता स्वरूपेण ब्रह्मत्वेनावतिष्ठते ४५ इति श्रीभावार्थदीपिकायां तृतीयस्क
न्धेऽष्टाविंशोऽध्यायः २८ एकोनत्रिंशके भक्तियोगस्तु बहुधोच्यते कालस्य च बलं तेभ्यो संसृतिश्च विरक्तये उक्तानु
वाद पूर्वं भक्तिमार्गभेदान् पृच्छति द्वाभ्यां लक्षणं महदादीनां यथा सांख्येषु तत्त्व कथितं तथा येन लक्षणेन तत्पार।

स्वयोनिषु यथा ज्योतिरेकं नानाप्रतीयते योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः ४४ तस्मादिमां
स्वां प्रकृतिं दैवीं सदसदात्मिकां दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठति ४५ इति श्रीभागवते तृतीय
स्कंधे कापिलेये साधनानुष्ठाने नामाष्टाविंशोऽध्यायः २८ देवहूतिरुवाच लक्षणं महदादीनां प्रकृ
तेः पुरुषस्य च स्वरूपं लक्ष्यतेऽमीषां येन तत्पारमार्थिकम् १ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्ष
ते भक्तियोगस्य मे मार्गं ब्रूहि विस्तरतः प्रभो २ विरागो येन पुरुषो भगवन्सर्वतो भवेत् आचक्ष्व
जीवलोकस्य विविधा लोकसंसृतीः ३ कालस्येश्वररूपस्य परेषां च परस्य ते
स्वरूपं बत कुर्वन्ति यद्धेतोः कुशलं जनाः ४ ॥

मार्थिकं परस्परविभक्तमित्यर्थः यो भक्तियोगो मत्ते प्रयोजनं यस्य तत् यन्मूलत्वेन कथितं तस्य भक्तियोगस्य
मार्गप्रकारं विस्तरेण मे ब्रूहि १ येन संसृतीनां श्रवणेन विगतरागो भवेत् ३ ईश्वररूपस्य महाप्रभावस्य ते
परात्मकस्य सदात्मकस्य यद्धेतोः यद्भयात् कुशलं पुण्यं कुर्वन्ति ४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

106

श्री भाग॰ टी॰ ९८ अचक्षुषः प्रसुप्तस्यातो मिथ्याभूते देहादावभिमतिरहंकारो यस्य तस्यातः कर्मस्वनुविद्धया सक्तया धिया श्रान्तस्य तत एव
श्रये तमसि संसारे चिरं प्रसुप्तस्य लोकस्य चक्षुर्भूतं योगं प्रकाशयितुं भास्करः किलाविर्भूतोऽसि ५ श्लक्ष्णं
सुन्दरं ६ मार्गैः प्रकारविशेषैः तानेवाह स्वभावभूता ये गुणास्तेषां मार्गेण वृत्तिभेदेन भावोऽभिप्रायः फल
संकल्पभेदाद्भक्तिभेद इत्यर्थः ७ अभिसंधाय संकल्प्य संरंभी क्रोधी भिन्नदृक् भेददर्शी यो भावं भक्तिं कु

लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये श्रान्तस्य कर्मस्वनुविद्धया धिया त्वमा
विरासीः किल योगभास्करः ५ मैत्रेय उवाच इति मातुर्वचः श्लक्ष्णं प्रतिनंद्य महामुनिः आबभाषे
कुरुश्रेष्ठ प्रीतस्तां करुणार्दितः ६ श्रीभगवानुवाच भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्य
ते स्वभावगुणमार्गेण पुंसां भावो विभिद्यते ७ अभिसंधाय यो हिंसां दंभं मात्सर्यमेव वा संरंभी
भिन्नदृग्भावं मयि कुर्यात्स तामसः ८ विषयानभिसंधाय यश ऐश्वर्यमेव वा अर्चादावर्चयेद्यो मां
पृथग्भावः स राजसः ९ कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणं यजेद्यष्टव्यमिति वा पृ
थग्भावः स सात्त्विकः १०

र्यात्स त्रिविधोऽपि तामसः ८ पृथग्भावो भेददर्शी ९ कर्मनिर्हारं पापक्षयं परस्मिन्परमेश्वरे तदर्पणं कर्मा
र्पणं भगवत्प्रीतिमुद्दिश्येत्यन्वयः यष्टव्यमिति विधिसिद्धिमुद्दिश्येत्यर्थः भेददर्शित्वं सर्वत्रार्चादावर्चनेनावि
शेषेऽपि समानं तदेवं तामसादिभक्तित्रयस्य त्रयो भेदाः तास्त्रय एव ... समत्वं च श्रव
णकीर्तनादयो नव प्रत्येकं नवनव भेदाः तदेवं सगुणा भक्तिरेकाशीतिभेदा निर्गुणा तु भक्तिरेकवि १०८

अविच्छिन्नासंतता ११ अहैतुकी फलाभिसंधानशून्या अव्यवहिता भेददर्शनरहिता मद्गुणश्रुतिमात्रेण मयि पु
रुषोत्तमे मनोगतिरिति या भक्तिः सा निर्गुणस्य भक्तियोगस्य लक्षणमित्यन्वयः लक्षणं स्वरूपं भक्तानां नि
ष्कामत्वं कैमुत्यन्यायेनाह १२ सालोक्यं मया सहैकस्मिन् लोके वासः सार्ष्टिः समानैश्वर्यं सामीप्यं नि
कटवर्तित्वं सारूप्यं समानरूपता एकत्वं सायुज्यं उतापि दीयमानमपि न गृह्णन्ति ज्ञाने तत्कामनेत्यर्थः किमि

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये मनोगतिरविच्छिन्ना यथा गंगांभसोंबुधौ ॥ ११ लक्षणं भक्ति
योगस्य निर्गुणस्य ह्युदाहृतं अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे १२ सालोक्यसार्ष्टिसामीप्य
सारूप्यैकत्वमप्युत दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः १३ स एव भक्तियोगाख्य
आत्यंतिक उदाहृतः येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते १४ निषेवितेनानिमित्तेन स्व
धर्मेण महीयसा क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः १५

तिनार्हं भजंते भक्तेरेव परमफलत्वादित्याह १३ ननु नैर्गुण्यं हित्वा ब्रह्मप्राप्तिः परमफलप्राप्तिहेतुः सत्यं तत्
तु भक्त्यानुषंगिकमित्याह येन भक्तियोगेन मद्भावाय ब्रह्मत्वाय एवंभूताया भक्तेः साधनान्याह पंच
भिः १४ निषेवितेन सम्यगनुष्ठितेनानिमित्तेन स्वधर्मेण नित्यनैमित्तिकेन महीयसा श्रद्धायुक्तेन क्रिया
योगेन पंचरात्राद्युक्तपूजाप्रकारेण शस्तेन निष्कामेन १५ ॥

107

श्री भा टी ३ २९

नुहिंस्यं मत्प्रतिमादितस्य दर्शनादिभिः सत्त्वेन धैर्येण असंगमेन वैराग्येण १६ १७ १९ मद्धर्मणो भगव
द्धर्मानुष्ठातुः पुरुषस्याशयः चित्तं प्रयत्नं विनैव श्रमो मां दृष्टान्तः १९ वातो रथः प्रापको यस्य गन्धस्य यथा घ्राणं स्वा
स्थानात् आवृंक्ते आत्मसात्करोति एवं अविकारि समं यच्चेतः चित्तं तस्य हि सर्वभूतात्मा दृष्टैव भवतीति अर्चां के

मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः भूतेषु मद्भावनया सत्त्वेनासंगमेन च १६ महतां बहुमानेन
दीनानामनुकंपया मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च १७ आध्यात्मिकानुश्रवणान्नामसंकी
र्त्तनाच्च मे आर्जवेनार्यसंगेन निरहंक्रियया तथा १८ मद्धर्मणो गुणैरेतैः परिसंशुद्ध आशयः
पुरुषस्यांजसाभ्येति श्रुतमात्रगुणं हि मां १९ यथा वातरथो घ्राणमावृंक्ते गंध आशयात्
एवं योगरतं चेत आत्मानमविकारि यत् २० अहं सर्वेषु भूतेषु भूतात्मावस्थितः स
दा तमवज्ञाय मां मर्त्यः कुरुतेर्चाविडंबनं २१ यो मां सर्वेषु भूतेषु संतमात्मानमीश्वरं हित्वार्चां
भजते मौढ्याद्भस्मन्येव जुहोति सः २२ द्विषतः परकाये मां मानि
नो भिन्नदर्शिनः भूतेषु बद्धवैरस्य न मनः शां
तिमृच्छति २३ ।

वलप्रतिमादिनिष्ठं निंदन्नाह समर्त्यः २० अर्चैव विडंबनं अनुकरणं अर्चायां स्थाप्यां विडंबनमिति वा अ
वज्ञोपेत्ता द्वेषनिंदाक्रमेण च तत्र भिन्निष्ठिध्यंते २१ हित्वा उपेत्य २२ २३

१०७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

107.A

द्रव्यैरुत्पन्नया क्रियया भूतग्रामावमानिनः तन्निन्दकस्यार्चादिकं किं अर्चावैवर्च्यं न समर्थकमेवेत्याह २४ सर्वेषु
तेष्ववस्थितं मां स्वहृदि यावन्न वेद स्वकर्मकृत् कर्माविरोधेन यथावकाशं अनेन कर्मनिष्ठस्यापि सपर्या
विधिरित्युक्तं भवति २५ आत्मनश्च परस्य देहयोर्दर्शितं उदरमल्पमपि भेदं यः पश्यतीत्यर्थः यद्वा आत्मपरयोर्मध्ये उदरं
दीर्घं मृत्युर्वहूतस्य भयं विदधे करोमि २६ अथातः सर्वभूतेषु कृतवासं ततश्च हेतोः भूतानामात्मानं मैत्र्या
भिन्न अभिन्नेन च चक्षुषा समदर्शनेन तत्रापि यथोत्तरं मानादति प्रायः कर्तव्य इति वक्तुं तारतम्यमाह

अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः २४ अर्चा
दावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितं २५ आत्मनश्च पर
स्यापि यः करोत्यन्तरोदरं तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणं २६ अथ मां सर्वभूतेषु भूता
त्मानं कृतालयं अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा २७ जीवाः श्रेष्ठा ह्यजीवानां ततः
प्राणभृतः शुभे ततः सचित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः २८ तत्रापि स्पर्शवेदिभ्यः प्रवरा रस
वेदिनः तेभ्यो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः २९

सार्धैः षड्भिः २७ अजीवेभ्योऽचेतनेभ्यः ततस्तेभ्योऽपि प्राणभृतः प्राणवृत्तिमन्तः सचित्तास्तानवृत्ताः इं
द्रियाणां वृत्तिर्येषु २८ इन्द्रियवृत्तयो वृक्षाणामपि सूक्ष्माः सन्त्येव तथा हि महाभारते मोक्षधर्मेषु
स्पर्शेन तस्मात्सम्पूर्ति पादपा निवृत्ति पादपास्ततः इत्यादि प्रभृतादि स्पर्शेन्द्रियवृत्तिरेवातस्तेभ्यः
स्पर्शवेदिभ्यो रसवेदिनो मत्स्यादयः श्रेष्ठा गन्धविदो भ्रमरादयः शब्दविदः सर्पादयः २९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रूपभेदविदः चाक्षुषाः उभयतोदन्ता येषां ते अपदेभ्यस्ततो बहुपादाः तेभ्यश्चतुष्पादा इत्यर्थः द्विपा
न्मनुष्यः ३० ततस्तत्र वर्णाः ३१ संशयच्छेत्ता मीमांसकः ततोऽपि केवलात् स्वधर्मकृत् मुक्तसङ्ग
स्त्वदोग्धा आत्मनो धर्मम् अधर्मं अदोग्धा अनिष्कामः इत्यर्थः ३२ अर्पिताः अशेषाः क्रियाः अर्थाः तत्फ
लानि आत्मा देहश्च येन सः तथा एवं निरन्तरः अनवच्छिन्नः अकर्तुः कर्तृत्वाभिमानशून्यात् ३३ जीवानां क

रूपभेदविदस्तत्र ततश्चोभयतोदतः तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ३० त
तो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ३१ अ
र्थज्ञात्संशयच्छेत्ता ततः श्रेयान् स्वकर्मकृत् मुक्तसङ्गस्ततो भूयानदोग्धा धर्ममात्मनः ३२
तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः ३ २
न पश्यामि परं भूतमकर्तुः समदर्शनात् ३३ मनसैतानि भूतानि प्रणमेद्बहुमानयन्
ईश्वरो जीवकलया प्रविष्टो भगवानिति ३४ भक्तियोगश्च योगश्च मया मानव्युदीरितः
ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् एतद्भगवतो रूपं ब्रह्मणः परमात्मनः परं प्रधानं
पुरुषं दैवं कर्मविचेष्टितं ३५ रूपभेदास्पदं दिव्यं काल इत्यभिधीयते ३६

लया परिकल्पनेन अन्तर्यामितया प्रविष्टः इति दृष्ट्वेत्यर्थः ३४ उक्तं भक्तियोगं पूर्वोक्तेनाष्टाङ्गयोगेन
सह उपसंहरति ३५ हे मानवि पुरुषं परमं पुरं यदेतद्रूपं जीवस्य संसृतिः कालस्य स्वरूपं वा
वदेति निर्दिष्टं सार्धेन ३६ एतत्सर्वं निर्दिष्टं यद्भगवतो रूपं कीदृशं पुरुषप्रधानपुरुषात्मक
परं तद्व्यतिरिक्तं च एतद्देवं दैवम् इत्यभिधीयते कीदृशं कर्म ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

108A

विवेचितंतेनानासंसृतिलक्षणंयस्मात्तत् देवहूतिकर्मकृताःसंसृतयोविविधाइत्यर्थः कीदृशंरूपभेदास्पदं
वलनामन्यथात्वस्यास्पदमाश्रयःकाम्यगुणक्रांदि कालाद्गुणव्यतिकरइतिवदन्तिच गुणव्यतिकरःका
लइतिदिव्यमद्भुतप्रभावम् तेदेवाहयावत्समाप्ति ३६ महदादीनांतत्तदभिमानिनांजीवानांभयदेत्वम
ह यदर्शनिभूतेस्वभूतान्यत्तिसंहरति ३७ अधियज्ञायज्ञफलदाताकलयतांवशीकुर्वतां ३८ ३९ ४० य

योऽन्तःप्रविश्येतियोऽन्तःमनसिअन्तर्यामितयाप्रविश्य

भूतानांमहदादीनांयतोभिन्नदृशांभयं योऽन्तःप्रविश्यभूतानिभूतैरत्त्यखिलाश्रयः ३७ सविष्ण्वा
ख्योऽधियज्ञोसौकालःकलयतांप्रभुः नचास्यकश्चिद्दयितोनद्वेष्योनचबान्धवः ३८ प्रविशत्यप्रम
त्तोसौप्रमत्तंजनमन्तकृत् यद्भयाद्वातिवातोयंसूर्यस्तपतियद्भयात् ३९ यद्भयाद्वर्षतेदेवोभग
णोभातियद्भयात् यद्वनस्पतयोभीतालताश्चौषधिभिःसह ४० स्वेस्वेकालेभिगृह्णन्तिपुष्पा
णिचफलानिच स्रवन्तिसरितोभीतानोत्सर्पत्युदधिर्यतः ४१ अग्निरिंधेसगिरिभिःभूर्नमज्जति
यद्भयात् नभोददातिश्वसतांपदंयन्नियमाददः ४२ लोकंस्वदेहंतनुतेमहान्सप्तभिरावृतं गुणा
भिमानिनोदेवाःसर्गादिष्वस्ययद्भयात् ४३

वृक्षाभीताः ४० ४१ इंधेदीप्यतेगिरिभिःसहप्रदोनभःयन्नियमाद्यदाज्ञयासंहरति ४२ महान्महत्तत्त्वंस्वदे
हात्मकंस्वदेहंलोकंनवनतनुतेविस्तारयति गुणाभिमानिनोगुणानियन्तारः देवाब्रह्मादयःयस्यवि
श्वस्यसर्गादिषुवर्तन्ते ४३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रनुष्टुभंवावमित्यर्थः जनेनापित्रादिना जनेनपुत्रादिजनयन् प्राणादिकृत मृत्युनांतकमपिमावयन्नेतकरः प्रनादिर
नेतोव्ययः ४५ इति श्रीभावार्थदीपिकायांतृतीये एकोनत्रिंशः २९ त्रिंशेतुकायकांतादिलालनाकुल
चेतसां कामिनांनामसौपापादयोगतिरुदीर्यते कालप्रभाववर्णनपूर्वकं वैराग्यायविविच्यकर्मकृतां संसृति
प्रध्यायत्रयेणायपंचवयाति तस्यैतस्यवलिनः कालस्यवलितेनेतिपादः कालमानोपिवाल्यमानोपिवायोरिव।

वंतेतगुणवैयसघनवधायनत्तुराचरं सोनंतोंतकरःकालोनादिरादिकृदव्ययः जनेनजनयन्मारय
न्मृत्युनांतकं ४५ इतिश्रीभागवतेतृतीयस्कंधेएकोनत्रिंशोध्यायः २९ कपिलउवाच तस्यैतस्य
जनोनूनंनायंवेदोरुविक्रमं कालमानोपिबलिनोवायोरिवघनावलिः १ यंयमर्थमुपादत्तेदुः
खेनसुखहेतवे तंतंधुनातिभगवान्पुमान्शोचतियत्कृते २ यदध्रुवस्यदे
हस्यसानुबंधस्यदुर्मतिः ध्रुवाणिमन्यतेमोहाद्गृहक्षेत्रवसूनिच ३ जंतुर्वैभवएतस्मिन्यांयां
योनिमनुव्रजेत् तस्यांतस्यांसलभतेनिर्वृतिंनविरज्यते ४ नरकस्थोपिदेहंवैनपुमांस्त्यक्तुमि
च्छति नारक्यांनिर्वृतौसत्यांदेवमायाविमोहितः ५ ॥

कर्मेयथ्यामेवपंक्तिंनवेदविक्रममेवाह १ यंयमर्थमुदुःखेनप्रयासेनउपादत्तेप्राप्नोतितंतंभगवान्का
लोधुनोतिविनाशयति यत्कृतेयन्निमित्तं २ शोकहेतुः यदध्रुवस्यसानुबंधस्यकलत्रादिसहितस्यसंबंधी
निवस्तूनि प्रवृत्तस्यत्वयार्थेस्वकारः दुर्मतिर्दर्शयन् ३ एवंप्रपंचयतिचतुर्दशभिः ३ ४ नारक्यां
नरकाहारादिनिर्वृतौ ५ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

109-A

निरूढमूलं प्रसृतमनोरथं हृदयं यस्य बद्धममते कृतार्थो दमिति स्माचतेऽहहस्मादि पानायोषणाविंत
गुरुत्वाशायानमाह ८ आदिति आत्माइंद्रियाणि विषयस्पकषाः सतीनांप्रुस्पलीनाद्दमित्र चित्स्या
सं भोगादि तृष्णया मधुरभाषिणां शिशूनां आलापैः सत्वस्वम्ममतेरनुबन्धेणानवृः ८ कृषांशि मत्ता
ज्ञादि बद्धलाभर्मार्थेषु दुःखेषु धानेषु ९ येषां पोषणेनात्मा आनिता स्वसाति शेषभुग्गतिमोपिनस्मा।

आत्मानं लायामृता गारथम् देविणं वेषुषु निरूढमूलहृदय आत्मानं बद्धममन्यते ८ सन्दत्तमा
नसर्वांगाप्स्वापुरह्नादिना कर्णौस्वबिरतं मूढोऽविलानिद्रावाशयः ? आदिमातेंद्रियःस्त्री
णामसतीनांच मायया रहोरचितयालापैः शिशूनां कलभाषिणां ८ गृहेषु कूटधर्मेषु दुः
ख खतंत्रेष्वतंद्रितः कुर्वन्दुःखप्रतीकारं सर्वन्ममन्यते शुभ्रम् ९ अर्थैरापादितैर्गुर्व्या हिंसये तस्त
तश्चतान् पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयं १० वार्त्तायां लुप्यमानायामारब्धा
यां पुनः पुनः लोभाभिभूतो निःसत्वः परार्थे कुरुते स्पृहां ११ कुटुंबभरणाकल्पो मंदभाग्यो
वृथोद्यमः श्रिया विहीनः कृपणो ध्यायन्स्वसिति मूढधीः १२ एवं स्वभरणाकल्पं तत्क
लत्रादयस्तथा नाद्रियंते यथापूर्वं कीनाशा इव गोजरं १३ तत्राप्यजातनिर्वेदो भ्रियमाणाः
स्वयंभृतेः जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे १४ ॥

दुर्लभं स्वमर्थं १० वार्तायां जीविकायां नितः सत्वः प्रसमर्थः परार्थे परवस्तु ११ अकल्पोऽसमर्थः
१२ पूर्वं यथादियंते तथा दरेन कुर्वंति कीनाशाः कृपणाः कृषीवलाः गोजरं वृद्धं बलीवर्दं १३ भ्रि
यमाणाः पोष्यमाणाः १४ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग ती १९

एवमस्याव त्वाय उपन्यस्तं समीपे प्रविष्टिमं गृहपालः प्राणं प्रदहन वर्भंगनानः ग्राममयावीवोगी १७ उत्नारोव
द्विनिर्गतेनेत्रः कफेन संरुद्धानाड्यायसम्यकाशासश्वासाभ्याकृतप्रायासो यस्यैत्रुवदंशतिशाद्रकवोति १९
परिवीतः परिवेष्टितः वाच्यमानो वंधोनातातेमाह्वयमानः १८ प्रक्षथीः नष्टमत्निसृतस्य गुणपा

प्राप्तेवमसोयमर्मं गृहपालइवादहन ग्राममयापेप्रदीमाग्निरल्पाह्लातोल्पचेष्टितः १७ वां
युनोत्क्रमतोत्तारः कफसंरुद्धनाडिका कासश्वासकृतायासः कंठे घुरघुरायते १९ श
यानः परितःशोचद्भिः परिवीतः स्ववंधुभिः वाच्यमानोपिनब्रूते कालपाशवशंगतः १८
एवंकुटुंबभरणोव्याप्तात्माजितेंद्रियः म्रियतेरुदतांस्वानामुरुवेदनयास्तधीः १८ यम
दूतौतदाप्राप्तौ भीमौसरभसेक्षणौ सदृष्ट्वात्रस्तहृदयः शकन्मूत्रंविमुंचति १९ यातना
देहमावृत्यपाशैर्वद्ध्वागलेवलात् नयतोदीर्घमध्वानंदंड्यंराजभटायथा २० तयोर्निर्भि
त्रहृदयस्तर्जनैर्जातवेपथुः पथिश्वभिर्भक्ष्यमाणआर्तोघंस्वमनुस्मरन् २१ क्षुत्तृड्परी
तोर्कदवानलानिलैः संतप्यमानः पथितप्तवालुके कृच्छ्रेणपृष्ठेकशयाचताडितश्च
लत्यशक्तोपिनिराश्रयोदके २२ तत्रतत्रपतञ्छ्रांतोमूर्छितः पुनरुत्थितः यथापापी

पाभ्यांदूतयोर्गतिमाह १८ सद्भक्तं सक्रोधमीक्षणेयत्योस्तौदृष्ट्वा १९ आवृत्यनिरुध्य २०
तर्जनेर्निर्भिन्नंहृदयंयस्यार्तः सन्नुच्चलतीतिद्वितीयः नान्वयः २१ क्षुत्तृड्भ्यांपरीतोव्याप्तः तमावाल्
कायस्मिन् निराश्रयः विश्रामस्थानेमुदकंचयस्मिन् २२ यममार्गेदंतमीतोभवति तत्रैवविशेष

१९ २० ८

110-A

प्रभुनः संवेष्टितानां योजनानां नवतिं नव च सहस्राणि पापाधिक्ये द्वाभ्यां नीतः सन् यातनाः संते पतितो दर्शा
यति २४ आदीपनं प्रज्वालनं प्राप्नोति स्वेनैव कृत्तं मांसं न वा कृत्तं छिन्नं यत्स्वमांसं तस्य भक्षणानि मिथः २
आत्मनो वैशसं पीडा २६ भिदापनं भेदनं प्रापणं न चैतदसंभावितम् अत्रापि दृश्यमानत्वादित्याह २८ मिथः

योजनानां सहस्राणि नवतिं नव चाध्वनः त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः २४ आ
दीपनं स्वगात्राणां वेष्टयित्वोल्मुकादिभिः आत्ममांसादनं क्वापि स्वकृत्तं परतोपि वा २५
जीवतश्चान्त्राभ्युद्धारः श्वगृध्रैर्यमसादने सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसं २६ कृन्तनं
चावयवशो गजादिभ्यो भिदापनं पातनं गिरिशृङ्गेभ्यो रोधनं चाम्बुगर्तयोः २७ यास्तामिस्रान्ध
तामिस्रा रौरवाद्याश्च यातनाः भुङ्क्ते नरो वा नारी वा मिथः संगेन निर्मिताः २८ अत्रैव नरकः
स्वर्ग इति मातः प्रचक्षते या यातना वै नारक्यस्ता इहाप्युपलक्षिताः २९ एवं कुटुम्बं बिभ्रा
ण उदरंभर एव वा विसृज्येहोभयं प्रेत्य भुङ्क्ते तत्फलमीदृशम् ३० एकः प्रपद्यते ध्वान्तं
हित्वेदं स्वकलेवरं कुशलेतरपाथेयो भूतद्रोहेण यद्भृतं ३१ दैवेनासादितं तस्य श
मलं निरये पुमान् भुङ्क्ते कुटुम्बपोषस्य हृतवित्त इवातुरः ३२ ॥

प्रबोधं संमेलनेन निर्मिताः कृताः २८ उभयं कुटुम्बपोषणं स्वदेहं च ३० पापार्जितेन धनेन भुज्यते वद
वः कुटुम्बं तेन नरकं यातीत्याह ३१ भूतद्रोहेण यद्भृतं तेन स्थूलेकलेवरमिदं विहाय कुशलादिन
रपापनं दैवया [illegible] भोगं यस्य ननु कुटुम्बपोषणपापमपि विहाय [illegible] ३२ तस्य कु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
तृ
३१
१११

तमसो नरकस्य चरमं पदं स्थानं पुनर्मनुष्यशरीरप्राप्तिक्रमम् आह ३२ मनुष्यदेहस्य प्राप्तेः सर्वा
कयावतीर्यातनाः आदिशब्देन सूकरादियोनिपर्यन्ताः ताः सर्वाः क्रमेण संप्राप्य भोगेन क्षीणपाप
सन् अत्र पुनर्नरत्वं प्राप्नोतीत्यर्थः ३४ इति श्रीभावार्थदीपिकायां तृतीये त्रिंशोऽध्यायः ३० एकत्रिंशे विमि
श्रैस्तु पुण्यपापैरिदं तथा मनुष्ययोनिसंप्राप्तिर्वर्ण्यते राजसी गतिः पुनरात्राव्रजेत्स्यक्तं तदेव विशो।

केवलेन ह्यधर्मेण कुटुम्बभरणोत्सुकः याति जीवोऽन्धतामिस्रं चरमं तमसः पदं ३३ अध
स्तान्नरलोकस्य यावतीर्यातनादयः क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ३४ ३०
इति श्रीभागवते तृतीयस्कन्धे कापिलेये तामसानेककर्मविपाको नाम त्रिंशोऽध्यायः ३० श्रीभग
वानुवाच कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये स्त्रियाः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः १
कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदं दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परं २ मासेन तु
शिरो द्वाभ्यां बाह्वङ्घ्र्याद्यङ्गविग्रहः नखलोमास्थिचर्माणि लिङ्गच्छिद्रोद्भवस्त्रिभिः ३ च
तुर्भिर्धातवः सप्त पञ्चभिः क्षुत्तृडुद्भवः षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे ४
सप्तमे जन्मकर्माणि गतानि स्मरते सुधिः ५

पूर्वकृतेन दैवमीश्वरः तदेव ने
नोदयति कर्मणा
त्रं प्रवर्तकं यस्य प्रविष्टो भवति १ कललं शुक्रशोणितमिश्रितं भवति बुद्बुदं वर्तुलं भवति क
र्कन्धूः बदरीफलं तदाकारं कठिनं पेशी मांसपिण्डाकारः अण्डं चर्मयामवतरे २ बाह्वङ्घ्र्याद्यङ्गानीति

॥ गर्भे विभागाऽसिगांगवज्ञिप्राणिसिंप्रप्रजुद्दवां ३ नगयुणागर्भेहिष्टेतवृतीतः
साधुनः ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

111-A

मातुः नवेन भक्षितेनान्नेन पानाद्यैश्च वर्धमानधातवो यस्य जंतुस्तं संभवं आसीन् प्रसंगतेन गर्भे विषमे शे
ते तथा च मार्कंडेयपुराणे नाडीवाप्यायनी नाम नाभ्यां तस्य निबध्यते स्त्रीणां तथान्त्रसूत्रे सुषिरे सा निबध्यते
प्रजापते क्रमेणेव भुक्तपीतादिभिः स्त्रीणां गर्भोदरे तथा तेनाप्यायितदेहोऽसौ जंतुर्वृद्धिमुपैति वै इति ५ तत्र
गर्भे कृमिभिः क्षारादिभिः सौकुमार्याद् अतिकोमलत्वेन नतरां नानिसर्वाङ्गानि यस्य २८ उल्बेनोरुः सहेः

मातुर्नभ्यान्नपानाद्यैरेधद्धातुः संभवेत शेते विण्मूत्रयोर्गर्ते सजंतुर्जंतु
संभवे २५ कृमिभिः क्षतसर्वाङ्गः सौकुमार्यात्प्रतिक्षणं मूर्छामाप्नो
त्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः २६ कटुतीक्ष्णोष्णलवणरूक्षाम्ला
दिभिरुल्बणैः मातृभुक्तैरुपस्पृष्टः सर्वाङ्गोत्थितवेदनः २७ उल्बेन संवृतस्तस्मि
न्नन्त्रैश्च बहिरावृतः आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः २८ अ
कल्पः स्वाङ्गचेष्टायां शकुन्त इव पञ्जरे तत्र लब्धस्मृतिर्दैवात्कर्म ज
न्मशतोद्भवं २९ स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विन्दते आरभ्य
सप्तमान्मासाल्लब्धबोधोऽपि वेपितः नैकत्रास्ते सू
तिवातैर्विष्ठाभूरिव सोदरः ३०

सर्वाङ्गेषूत्थिता वेदना यस्य स तथा तस्मिन्नुदरे उल्बेन जरायुणा भुग्नं कुटिलीभूतं पृष्ठं शिरो
धरा ग्रीवा च यस्य २८ दैवात्पूर्वकर्मवशात् लब्धस्मृतिर्यतस्ततः दीर्घं दुःखेनाप्युच्छ्वासं यथा भवति तथा
तत्र स्थितः सन् २९ सूतिवातैः प्रसूतिवातैर्वेपितः सोदरः समानोदरजन्मा विष्ठाभूः विष्ठोत्पन्नः

॥
॥

श्री भाग० टी० ११२

नाथमानो याचमानः उपतप्यमान इति वा ऋषिः देहात्मदर्शी भीतः पुनर्गर्भवासात् सप्तवध्रयो यावे धनम्भ
ता धातवो यस्य विक्लवया स्खलितया ॥ उपसन्नं नंदतीति तं स्वेच्छया गृहीतनानामूर्तेः भगवतः चरणा
रविंदं प्रकुतो भयं सोऽहं शरणं व्रजामि भुवि चलदिति श्रीकृष्णावताराभिप्रायेण असतो दुर्जनस्य मे अनु
रूपा योग्या येन ईदृशी गर्भवासलक्षणा गतिर्दर्शिता तस्य न तु कोऽसौ यं शरणं व्रजसि को वा तस्य विशे
षः येन तमेवमेव करवामित्यपेक्षायामाह यस्त्विति अत्र मानकर्म्मदेहे भूतेन्द्रियाशयमयीं देहाकारपरि

नाथमानो ऋषिर्भीतः सप्तवध्रिः कृताञ्जलिः स्तुवीत तं विक्लवया वाचा
येनोदरेऽर्पितः ११ जीव उवाच तस्योपसन्नमवितुं जगदिच्छयात्तनाना
तनोर्भुवि चलच्चरणारविन्दं सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येने
दृशी गतिरदर्श्यसतोऽनुरूपा १२ यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भू
तेन्द्रियाशयमयीमवलम्ब्य मायां आस्ते विशुद्धमविकारमखण्डबोध
मातप्यमानहृदयेऽवसितं नमामि १३ ॥

राम राम
राम

णां मायामवलम्ब्याश्रित्य कर्मभिरावृतस्वरूपः बद्ध इवास्ते सोऽहं यस्त्वत्रैव तेन मासिकं भूतमित्य
पेक्षायां तच्छास्त्रोक्तं विशेषं दर्शयति आतप्यमाने हृदये वासितं प्रतीतमेवमप्यविकारं तेन न कु
तो विशुद्धं तेन हैवापि तत्र कुतः आस्ते दोषो वा अथाय स्यात् न तु बन्धमपि वस्तुनः शुद्धमेव प्रसंगोऽप्यस्य येषु
रूपरतिस्थादिभिर्गुणैः नम कथं तु वयोरयं विशेषस्तत्राह १३ ॥ ११२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

112-B

यं पंचभिर्भूतैरचिते शरीरे प्रयया मिथ्यैव कृत्वः नवस्तुतः यतस्तेन शरीरेण रहितोसु यः प्रत्येयथैवेंद्रि
यगुणार्थचिदात्मकः इंद्रियाणि गुणाश्चार्थाश्च चिदाभासश्च तदात्मकः सोहं तत्वदेकत्र भूतेन तेन शरीरेण
प्रविकुंठो महिमा यस्येत्यर्थः तत्र हेतुः तमवकुंठति पादितिप्रवसन्ने गुंठनेति पाठे प्रवसन्ने गुंठनमावर
णायस्य स महिमा यस्येत्यर्थः तत्र हेतुः प्रकृतिपुरुषयोः परं नियंतारं कृतः अपि सर्वं ते विद्याशक्ति
मित्यर्थः विद्याशक्तिः विद्याकृतो विशेष इति भावः ननु ज्ञाने नायं बंधो निवर्तिष्यते किं परमेश्वरेव
हंनेन तत्राह १४ यन्मायया यया नष्टस्मृतिः सन् संसारसंबंधिनि पथि चरंस्तदभिश्रमेण तत्र हूतेन लोकेन

यः पंचभूतरचिते रहितः शरीरे छन्नोऽयथेंद्रियगुणार्थचिदात्मकोऽहं तेनाविकुंठमहिमा
नमृषिं तमनं वंदे परं प्रकृतिपूरुषयोः पुमांसम् १४ यन्माययोरुगुणकर्मनिबंधनेऽस्मिन्सां
सारिके पथि चरंस्तदभिश्रमेण नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या कया महदनुग्रहमंत
रेण १५ ज्ञानं यदेतददधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः तं जीवकर्म
पदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम १६

चरन्नयं जीवो महत्तमसः सेवे स्वरस्यानुग्रहं विना पुनः कया युक्त्या लोकं निजस्वरूपं प्रवृणीत संभजेत प्रा
तिश्रमहेतुत्वेन पथानं विशिनष्टि उरूणि गुणनिमित्तानि कर्माणि बंधनानि यस्मिन् ईश्वरप्रसादं विना
ज्ञानाभावात्स्मृत्यसंभव इत्यर्थः ईश्वर एव ज्ञानदस्त्वमुपपादयन्नाह १५ यदेतत् त्रैकालविषयं ज्ञानं तत्त
त्वविनाकृतमस्मास्वदधात् न कोपि किंतु स देव ईश्वर एव अतः स प्रकृत्यो जीवोदधात् तत्र तेषां जीवा
नामंशभूतः स पदवीमनुवर्तमानाः वयमिति तत्स्य निरेकेण न कोपि समर्थ इत्यर्थः अस्मदादि संभवसुका

स्या

तस्य संभवमाह स्थिरेषु चरेषु चांतर्यामित्वेनास्मदुपास्यत्वमाह ईश्वरस्य
ईशविज्ञानपदत्वमाह १७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा॰ टी॰
तृ॰
११३

113

अन्यदेहविवरे मातरुदरे जठरेणासृग्विण्मूत्रकूपः तस्मिन्पतितः तत्र जठराग्निना भृशं तप्तो
देहो यस्य अतएव कृपणा धीर्यस्य इतो विवरात् विवसितुं निर्गन्तुमिच्छन् स्वमासान् गणयन्नसौ क
दा नु वहिर्निर्वास्यते तेन कृतनमस्कारः स्मरन्नाह १७ येनेदृशीं गतिं ज्ञानं भवादृशेनानितिरूपमेव स्वयंः
स्वकृतेनैव तुष्यतु अञ्जलिमात्रं विना तत्कृतोपकारे कः प्रत्युपकारं कर्तुं समर्थः स्वकृतेनैव स्व।
यं तुष्यतु अञ्जलिमात्रं ईदृशीं गतिमित्यनेन ज्ञानस्य नरविलक्षणत्वात् ज्ञानं प्रापितवानित्युक्तं तदेव वैलक्षण्यं

देह्यन्यदेहविवरे जठराग्निनासृग्विण्मूत्रकूपपतितो भृशतप्तदेहः इच्छन्नितो विवसितुं गण
यन्स्वमासान्निर्वास्यते कृपणधीर्भगवन्कदा नु १७ येनेदृशीं गतिमसौ दशमास्य ईश संग्राहि
तः पुरुदयेन भवादृशेन स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनाञ्जलिमस्य कु
र्यात् १८ पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे यत्सृष्टया
सं तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीतं १९ ॥

माह १८ पश्यत्ययं अपरः पश्वादिः सप्तवध्रिः जीवः स्वदेहे शारीरके शरीरभवे सुखदुःखे केवलं न तु प
श्यत्ययं पुनर्यत् सृष्टया धिषणया यत् दत्तेन विवेकज्ञानेन दमशरीरी इदमशरीरः उपलक्षणं शमदमादियुक्त
शरीरवान् असमहं प्रभवन्तमेव पुराणमनादिं पुरुषं प्रतीतं वहिर्हृदि च पश्ये पश्यामीत्यन्वयः
कथमपरोक्षतया प्रतीतं चैत्यमिवाहंकारास्पदं भोक्तारमिव न पर्यः विवेकज्ञानेन कृतेन संसारोद्वेगा
मतुबद्धन्मोदमार्गमेवाध्यवस्यतीति द्वाभ्यां १९ ॥ ॥

113-A

हे विभो बहुदुःखवासं यथा भवति तथा गर्भे वसन्नपि सोऽहं गर्भाद्बहिर्निर्गन्तुं नेच्छामीत्यन्वयः अं-
धकूपे यत्र देवं बहिः रूपयान्तं गतं मां जनं देवमायोपसर्पति यत्र शोनिपट्टनु यां मायामनु मिथ्या
मतिः देहे देहबुद्धिः संसृतिचक्रं च पुत्रकलत्रादिसंबंधाद्युपसर्पति १९ तस्माद्देवविस्थितोऽपि शोकाकु-
लः सन् सुहृदात्मना सारथिरूपेणात्मनोपायेनात्मानं तमसः संसारादुद्धरिष्यामि अनेकरंध्रं नानाभ-
वा सन्नुपस्थितमेतद्व्यसनं दुःखं यथा मे मा भविष्यति तथाकालनवाक्वसाधनमासमश्रीनंवाह उप

सोऽहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरंधकूपे यत्रोपयातमुपसर्पति
देवमाया मिथ्या मतिर्यदनु संसृतिचक्रमेतत् २० तस्मादहं विगतविक्लव उद्धरिष्य आ-
त्मानमाशु तमसः सुहृदात्मनैव भूयो यथा व्यसनमेतदनेकरंध्रं मा मे भविष्यदुपसादि-
तविष्णुपादः २१ कपिल उवाच एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः सद्यः क्षिपत्यवा-
चीनं प्रसूत्यै सूतिमारुतः २२ तेनावसृष्टः सहसा कृत्वावाक्शिर आतुरः विनिष्क्रामति कृच्छ्रे-
ण निरुच्छ्वासो हतस्मृतिः २३ पतितो भुवि विण्मूत्रे विष्ठाभूरिव चेष्टते रोरूयति गते ज्ञाने वि-
परीतां गतिं गतः २४ परच्छंदं न विदुषा पुष्यमाणो जनेन सः अनभिप्रेतमापन्नः प्रत्याख्यातुमनी-

मास्तित्वोहृदयं प्रापितो विक्लवः पातो येन मया सः २१ दशमासाः परिच्छेदका यस्येति एवं स्तुवतो
पलम्बमानं अवाचीनं अधःशिरसं तत्क्षणमेव वायुः प्रसूतिहेतुर्मारुतः क्षिपति २२ अवसृष्टः
अधः क्षिप्तः सन् २३ रोरूयते रोदिति २४ परच्छंदं परस्याभिप्रायमविदुषा जनेन यमनभिप्रेतं
तत्प्रत्याख्यातुं प्रतिषेद्धुमनीशः रोदनेन तत्पानमभिमतादि २५

ना१

114

श्री आसनोत्थानचेष्टने चानीशः स्वतो गृहपतेरप्यनुषंगः २६ आमा कोमला त्वक् यस्य तं गते गर्भमात्रं तानेयस्य
भाग २७ पौगंडं पंचवर्षाणि ततः पौगंडं यौवनादर्वाक् तं च बाल्यपन्नादिङ्ः त्वमाद्रुमसायैर्विभिः २८ अलब्धाभी
टी प्सितनेत्रं शुचार्दितः ध्यानः अज्ञानात्स्द्दिष्टो दीप्तो मत्सुपस्पृशः देहेन सहैव वर्धमानेन मन्युना च विरोधं करो
११४ ति ग्रामेनोनाम यत्नाप्नाय अज्ञानेपरयेच्चयति २९ भूतैः पंचभिरारब्धे देहे दत्ताग्रहोः देहममेति करोति ३० तद

शायितोऽशुचिपर्यंके जंतुः स्वेदजदूषिते नेशः कंडूयनेंगानामासनोत्थानचेष्टने २६ तुदंत्या
मत्वचं दंशामशकामत्कुणादयः रुदंतं विगतज्ञानं कृमयः कृमिकं यथा २७ इत्येवं शैशवं भु
क्त्वा दुःखं पौगंडमेव च अलब्धाभीप्सितो ज्ञानादिद्धमन्युः शुचार्दितः २८ सह देहेन मानेन व
र्धमानेन मन्युना करोति विग्रहं कामी कामिष्वंताय चात्मनः २९ भूतैः पंचभिरारब्धे देहे दे
ह्यबुधोऽसकृत अहंममेत्यसद्ग्राहः करोति कुमतिर्मतिं ३० तदर्थं कुरुते कर्म यद्बद्धो याति संसृ
तिं योनुयाति ददत्क्लेशमविद्याकर्मबंधनः ३१ यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः आ
स्थितो रमते जंतुः तमो विशति पूर्ववत् ३२ सत्यं शौचं दया मौनं बुद्धिर्ह्रीः श्रीर्यशः क्षमा श
मो दमो भगश्चेति यत्संगाद्याति संक्षयं ३३

र्थं देहार्थं येन कर्मणा बद्धो देहः अनुयाति पुनः पुनरायाति अस्य तु वर्तते रति वा क्रतः अविद्याकर्मभ्यामिति
बंधनं यस्य तथा ३१ यद्यसद्भिः रोचिताः ततः सत्संगेषां पयत्यमनुष्यात्मारामते आस्थितो वियद्यसद्भिः सह रमते
इति वानर्हियानतादेहश्चाहमेस्माहिएवंजा प्रकारेणानरकं प्रविशति ३२ असत्संगं निंदति त्रिभिः ३३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

114-A

खंडितात्मसु देहात्मबुद्धिषु योषितां क्रीडामृगवदधीनेषु ३४ यथा च योषित्संगिनां संगतो बंध
स्तथान्यप्रसंगतो न भवेत् योषित्संगस्यानर्थहेतुतां प्रपंचयति सप्तभिः ३५ रोहिद्भूतां मृगीरू
पां सतीं स ऋक्षरूपो मृगरूपः निर्लज्जः सन् ३६ तेन ब्रह्मणा सृष्टा ये मरीच्यादयः पुत्राः तैः सृष्टाः
कश्यपादयः तैरपि देवमनुष्यादयः तेषु को नु पुमान् अखंडितधीः अनाकृष्टमनाः ३७ दिशांज

[illegible] ८५

तेष्वशांतेषु मूढेषु खंडितात्मस्वसाधुषु संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च
३४ न तथास्य भवेन्मोहो बंधश्चान्यप्रसंगतः योषित्संगाद्यथा पुंसो यथा तत्संगिसंग
तः ३५ प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः रोहिद्भूतां सोन्वधावदृक्षरूपो हतत्रपः
३६ तत्सृष्टसृष्टसृष्टेषु को न्वखंडितधीः पुमान् ऋषिं नारायणमृते योषिन्मय्येह मायया
३७ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशां या करोति पदाक्रांतान् भ्रूविजृंभेण के
वलं ३८ संगं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः मत्सेवया प्रतिलब्धा
त्मलाभो वदंति या निरयद्वारमस्य ३९ योपयाति शनैर्माया योषिद्देवविनिर्मिता तामी
क्षेतात्मनो मृत्युं तृणैः कूपमिवावृतं ४० यां मन्यते पतिं मोहान्मन्मायामृषभायतीं स्त्रीत्वं

यिनः ऋक्षपानपि ३८ प्रतिलब्ध आत्मस्वरूपो लाभो येन तस्य मुमुक्षोः यां प्रमदां निरयद्वारं वदंति यो
गिनः ३९ शनैः शुश्रूषणादिमिषेण उपयाति या योषिद्रूपा माया मृत्युं प्रतिकूलमीक्षेत स्त्रियं प्रत्ये
तद्देवाह यामिति द्वाभ्यां ऋषभायतीं पुरुषवदाचरंतीं यां वित्तादिप्रदं पतिं मन्यते स्त्रीसंगतः यंतका

स्त्रीसंगतः प्राप्तो वित्तापत्यगृह

ले स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः ४१ ४१

इछेत्मृत्युः २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

115

श्री॰ भाग॰ टी॰ ११५

तांपद्मादिरूपांमृत्युंजानीयात मृगयोःलब्धकस्यगायनमनुकूलत्वेनप्रतीयमानमपियथामृगस्य
मृत्युः ४२ तदेवंजीवस्यसंसृतिःप्रपंचिता तत्रचतस्यकर्मवशेनलोकाल्लोकांतरगमनेजन्म
मरणंचोक्तंनैवघटते ननुव्यापकस्यकथंलोकाल्लोकांतरगमनंनित्यस्यचकथंजन्मम
रणेभोगेनकर्मक्षयेचसतिजन्ममरणेवेष्यतेतत्र अतःपुनरपितस्यकर्मसंभवइतितत्रलो
कांतरगमनेकर्मवशोभवतीत्याह देहेनजीवस्योपाधितयाभूतेनजातेनलिंगदेहेनलोकांत
रमनुव्रजन्नविरतंकर्माणिकरोतीतिकर्मणामसमाप्तिकृतंजन्ममरणसंभवमाह ४३ जी

तामात्मनोविजानीयात्पत्यापत्यगृहात्मकं दैवोपसादितंमृत्युंमृगयोर्गायनंयथा
४२ देहेनजीवभूतेनलोकाल्लोकमनुव्रजन् भुंजानएवकर्माणिकरोत्यविरतंपु
मान् ४३ जीवोस्यानुगतोदेहोभूतेंद्रियमनोमयः तन्निरोधोस्यमरणमाविर्भावस्तु
संभवः ४४ द्रव्योपलब्धिस्थानस्यद्रव्येक्षायोग्यतायदा तत्पंचत्वमहंमाना

वस्योपाधिर्लिंगदेहः अस्यात्मनोनुवर्तीभूतेंद्रियमनोमयः स्थूलभूतादिविकारोदेहभोगायत
नंतस्यनिरोधःकार्यायोग्यतातदस्यजीवस्यमरणमुच्यते आविर्भावस्तुसंभवोजन्मोच्यते एतदे
वदृष्टांतेनस्पष्टयति ४४ द्रव्योपलब्धिस्थानस्यनेत्रगोलकादेःद्रव्येक्षायांरूपादिदर्शनेका
चकामलादिदोषेणयदायोग्यतातदैवचक्षुरिंद्रियस्याप्ययोग्यता अनयोःस्थानचक्षुषोःय
दायोग्यतातदैवद्रष्टुर्जीवस्यद्रष्टृतायोग्यता एवंस्थूलदेहवैकल्येलिंगदेहस्यवैकल्यंतदेव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

115-A

कश्चिदपरकः श्लोकोधिकः पठ्यते तत्रायमर्थः दुःखोपलब्धिस्थानस्य स्थूलशरीरस्य द्वयोर्द्वार्ययदा
योगपत्तानस्य चैवमरणोग्रहमानादिदमेवाह मिथ्याभिमानेन दृश्यस्य स्थूलशरीरस्य दर्शनमुत्पत्तिः
प्रतीतिमालब्धयोः द्रष्टा वयवस्य दृश्यायतुपाद्देद्र्शनेयोगपत्ताशेषेसमानत्वम् ४६ यस्माज्जीवस्ततोजीव
स्य नस्य मृत्यादितस्मात मरणान्तसंत्रासोनकार्यः जीवेन चकार्पण्यनकार्यः संभ्रमस्तु जीवनम
त्वेनेनमवेयाभूतं संगान्तेकार्यं जीवितमित्याह ४७ सम्यक्दर्शनविद्यास्यतीतिनत्याश्रयामायाविर
यथाहृतांगदृश्यावयवदर्शनायोगपत्तायदा तस्य चैवमहंमानाद्उत्पत्तिर्द्वयोर्गपत्तो ४८ तस्मा　　दर्शनम
नकार्यः संत्रासोनकार्पण्यनसंभ्रमः बुद्ध्वाजीवगतिंधीरोमुक्तसंगश्चरेदिह ४७ सम्यक्दर्शन
याश्रयायागवेराग्ययुक्तया मायाविरचितेलोकेचरेन्यस्यकलेवरं ४८ इतिश्रीभागवतेतृतीय
स्कंधेकापिलेयोपाख्यानेजीवगतिर्नामएकत्रिंशोध्यायः ३१ कपिलउवाच अथयोगृहमेधीया
न्धर्मानेवावसन्गृहेकाममर्थंचधर्मान्स्वान्दोग्धिभूयःपिपर्तितान् १ सचापिभगवद्धर्मात्काममूढःप
राङ्मुखः यजतेक्रतुभिर्देवान्पितॄंश्चश्रद्धयान्वितः २ ॥राम॥राम॥राम॥राम॥

विते लोके कलेवरं न्यस्य नितिष्ठतेसिद्धामक्रियाकाचवरेदित्यर्थः ४८ इतिश्रीभावार्थेतृतीयेएक
त्रिंशः ३१ द्वात्रिंशोमानिकेयमेत्रयीगतिरुदीर्यते तत्र ज्ञानविहीनस्यततश्च पुनरागतिः तदेवंपापक
र्मणांगतिमुक्त्वाइदानींकाम्यकर्मणांगतिमाह चतुर्भिः योगृहमेवावसन् स्वान्धर्मान् दोग्धिदोहमा
हकाममर्थंचतान्दोग्ध्यर्थमनुभूयःपिपर्तिपूरयति अनुतिष्ठति १ सोपिभगवद्धारायतनपराङ्मु
रवात् उभयःसनप्राकृतानदेवाम्पितॄंश्चयजतेकिंतेनत्याह २ ॥ ॥ ॥

तेषां श्रद्धयाक्रांतामतिर्यस्य पित्र्यं देवार्थं च व्रतं नियमो यस्य स सोमपः तस्य सोमं पीत्वेत्यर्थः ३ लोकेति ए
त्यपि पुण्यवतामात्र कालोकानामपि लयमाह यदा चाहींद्रः शेषः स एव तल्पं भगवद्भक्तिहीनानां तस्मा
न्निमेव गतिमाह त्रिभिः ४ ये तु कामार्थप्रयोजनतया स्वधर्मं न दुह्यंति निःसंगाः अनासक्ता न्यस्तानि ई
श्वरे समर्पितानि कर्माणि यैः ५ विश्वतोमुखं सर्वपरिपूर्णं पुरुषं यांति तथा च श्रुतिः सूर्यद्वारेण ते वि

तच्छ्रद्धयाक्रांतमतिः पितृदेवव्रतः पुमान् गत्वा चांद्रमसं लोकं सोमपाः पुनरेष्यति ३ यदा
चाहींद्रशय्यायां शेतेनंतासनो हरिः तदा लोका लयं यांति त एते गृहमेधिनां ४ ये स्वधर्मान्
१ न दुह्यंति धीराः कामार्थहेतवे निःसंगा न्यस्तकर्माणः प्रशांताः शुद्धचेतसः ५ निवृत्ति
धर्मनिरता निर्ममा निरहंकृताः स्वधर्माख्येन सत्वेन परिशुद्धेन चेतसा ६ सूर्यद्वारेण
ते यांति पुरुषं विश्वतोमुखं परावरेशं प्रकृतिमस्योत्पत्त्यंतभावनं ७ द्विपरार्धावसाने यः
प्रलयो ब्रह्मणस्तु ते तावदध्यासते लोकं परस्य परचिंतकाः ८ क्ष्माम्भोनलानिलवियन्मन
इंद्रियार्थभूतादिभिः परिवृतं प्रतिसंजिहीर्षुः अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं
पराख्यमनुभूय परः स्वयंभूः

रजाः प्रयांति यत्रामृतः पुरुषो ह्यव्ययात्मेति प्रकृतिमुपादानकारणं अस्योत्पत्त्यंतभावनं निमित्तकार॰
णं परमेश्वरं इति हिरण्यगर्भोपासकानामपि क्रमेणैव मुक्तिमाह त्रिभिः ६ परस्य हिरण्य
गर्भस्य ये चिंतकाः परमेश्वरस्य हिरण्यगर्भोपासकाः ७ क्ष्मादीनि पंचमहाभूतानि मनश्च
इंद्रियाणि च अर्थाः शब्दादयः भूतादिरहंकार एवमादिभिः परिवृतं ब्रह्मांडं संजिहीर्षुः
मिच्छुः सन्नव्याकृतमीश्वरं यदा स्वाधिकारावसानकाले यर्हि यस्मिन्समये त्रिगुणात्मकरूपोयं विशति ॥८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

116-A

परेश्वरंगत्वाभगवंतंहिरण्यगर्भमनुप्रवृष्टायेयोगिनः प्रस्ततेपरमानंदरूपंप्रधानमव्यक्तंचब्रह्मतेनैवसह
पर्यंतेनिवर्ततएवेश्वर्यंयतस्तदाभगताभिमानाः तथाचश्रुतिः ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृ
तात्मानः प्रविशंतिपरंपदमितिभगवदुपासकास्तुसालोक्यादिवत्तेयामुवंतिनतत्क्रमेणप्रतस्त्वेसात्ताद्वेम
वभजेत्याह ९ अथयत्तस्माद्भावेनप्रेमणापवेनतावद्भगवद्भक्तानांनिरंतरमेवतत्प्राप्तिः भगवदभेदेन।
हिरण्यगर्भोपासकानांक्रमेणोक्तंभेदेनोपासनेतुवृत्तादयोप्यावर्तंते किमुतान्यइत्याहद्वाभ्यांभिः १०

एवंपरेत्यभगवंतमनुप्रविष्टायेयोगिनोजितमरुन्मनसोविरागाः तेनैवसाकममृतंपुरुषं
पुराणंब्रह्मप्रधानमुपयांत्यगताभिमानाः ९ अथतंसर्वभूतानांहृत्पद्मेषुकृतालयं श्रुतानुभा
वंशरणंव्रजभावेनभामिनि १० आद्यःस्थिरचराणांयोवेदगर्भःसहर्षिभिः योगीश्वरैःकुमारा
द्यैःसिद्धैर्योगप्रवर्तकैः ११ भेददृष्ट्याभिमानेननिःसंगेनापिकर्मणा कर्तृत्वात्सगुणंब्रह्म
पुरुषंपुरुषर्षभः १२

॥ ॥ ॥

योवेदगर्भः सोपिगुणव्यतिकरेजातेएवंयथाब्रह्मपदाधिकृतः सन्प्रजायतेनकेवलंसएवकिं
तुऋषिभिर्मरीच्यादिभिः वसहजन्मतिरोहितत्वद्येभेददृष्ट्याभिमानेनकर्तृत्वादिति यथाएवंभेदे
तः ॥ निःसंगेननिष्कामेनकर्मणाकिंहृत्वाप्रजायतेप्रथमंपारमेष्ठ्यंनिषेव्यपश्चात्मत्तयेसगु
णंगुणाधिष्ठंप्रथमावतारपुरुषं १२ ॥

ष्यैमै १

मे सत्यमाप्य १३ तेपि कर्मविनिर्मितमैश्वर्यं निषेव्य पुनः कथं च मे सत्यधायं ये ऐश्वर्येऽवाधिकारेण पु
नरायांतीत्यन्वयः १४ एवमुपासकानामपि भेददर्शिनामावृत्तिः तदा काम्यकर्मिणां किं वक्तव्यमि
त्याह ये त्विति षड्भिः ये त्विति कर्मसु आसक्तमनसः संतः अप्रतिषिद्धानि काम्यानि नित्यानि च कर्माणि कृत्स्न
शः कुर्वंतीति संबंधोऽ दक्षिणेन पथा धूममार्गेण पितृलोकं व्रजंतीति पंचमेनान्वयः मध्ये तद्विशेषणानि १५ १९ त्राह

तमेव सत्यं पुनः काले कालेनेश्वरमूर्तिना जाते गुणव्यतिकरे यथापूर्वं प्रजायते १३ ऐश्वर्यं पारमे
ष्ठ्यं च तेपि कर्मविनिर्मितं निषेव्य पुनरायांति गुणव्यतिकरे सति १४ ये त्विहासक्तमनसः कर्म
सु श्रद्धयान्विताः कुर्वंत्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः १५ रजसा कुंठमनसः कामा
त्मानोऽजितेंद्रियाः पितॄन् यजंत्यनुदिनं गृहेष्वभिरताशयाः १६ त्रैवर्गिकास्ते पुरुषा विमु
खा हरिमेधसः कथायां कथनीयोरुविक्रमस्य मधुद्विषः १७ नूनं दैवेन निहता ये चा
च्युतकथासुधां हित्वा शृण्वंत्यसद्गाथाः पुरीषमिव विड्भुजः १८ दक्षिणेन पथार्यम्णः पितृ
लोकं व्रजंति ते प्रजामनुप्रजायंते श्मशानांतक्रियाकृतः १९ ॥

तस्य हरि मेधसश्च
हरतीति संसारं मेधायस्य कथनीय उरुर्विक्रमो यस्य तस्य मधुद्विषः कथायां विमुखाः संतो ये त्रैवर्गिकाः धर्मार्थकामिनः
१७ ये चाच्युतस्य कथामृतं हित्वा असतां गाथाः शृण्वंति ते नूनं दैवेन निहता इत्यन्वयः १८ पितृलो
कात्पुनः प्रजामनु पुत्रादिषु प्रजायंते गर्भाधानादारभ्य श्मशानांताः क्रियाः कृता यैस्ते यथोक्त
कारिणः स्वयं कथं प्रजायंते तदाह १९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

117-A द्वीपांकुर्यये षांते

वासुदेव इति वैराग्यं यत्तमानादि ब्रह्मदर्शनं ज्ञानं २

देहतिमातः ततस्तेऽपुनरिमंल्लोकं पतंति पतंतिविभ्रंशितउदयोभोगसाधनं येषां ते २० परमेष्ठिनं परमेश्वरं तस्य गुणाना स्य
श्रयो येन सा भक्तिस्तया भजनेन वज्ञानवैराग्ये स्वतएव भवत इत्यर्थः २१ तदेवोपपादयति २२ यदास्य भक्तं चित्तं
भगवतस्तद्गुणानुरागेण तस्मिन्नेव निश्चलं तत्समेष्विंद्रियवृत्तिभिः वैषम्यमर्थेषु न गृह्णाति २३ तदैवात्मानं स्व
प्रकाशमीक्षते कथंभूतं समं च तद्दर्शनं चेति तत् अतो निःसंगं संगाद्धि वैषम्यं भवति निःसंगत्वे हेतुः

मे
ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति पतंति विवशा देवैः सद्यो विभ्रंशितोदयाः २० त
स्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनं तद्गुणाश्रयया भक्त्या भजनीयपदांबुजं २१ वासुदेवे भगवति
भक्तियोगः प्रयोजितः जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनं २२ यदास्य चित्तमर्थेषु समेष्विं
द्रियवृत्तिभिः न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत २३ स तदैवात्मनात्मानं निःसंगं सम
दर्शनं हेयोपादेयरहितमारूढं पदमीक्षते २४ ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् दृ
श्यादिभिः पृथग्भावैर्भगवानेक ईयते २५ ॥

परमात्मा २

हेयोपादेयरहितं ततः कृतः पदं व्यवसितमारूढं परमानंदोऽहमिति निश्चयं प्राप्तमित्यर्थः समेष्वर्थेषु वि
षमबुद्धिं न देवसाम्यं दर्शयति २४ ज्ञानमात्रमेव परं ब्रह्मादिशब्दैः प्रसिद्धं दृश्यादिभिः दृश्यद्रष्टृक
रणरूपेण पृथक् प्रतीयते ज्ञानमात्रत्वेन समेषु इत्यर्थः ननु ज्ञानमात्रे स्वात्मनः स्वरूपत्वात् नित्य
प्राप्तमेव तत् किमनेकसाधनसाध्येन योगेन प्राप्यते तत्राह २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पं

118

श्री भाग टी ११८ पुरुषस्यैकस्यैव पंचमे गच्छत्तामप्यभ्योगफलमित्यर्थः ननु कथं महत्त्वादिप्रतीतिः प्रपंचेवोद्युदासितं शक्य
ते प्रतीतेः भ्रान्तत्वादित्याह २८ पराचीनैः पराग्वृत्तैः शब्दादिधर्मिणा यस्य तेनार्थरूपेण ज्ञानरूपं निर्गुणं ब्रह्म
व भाति न त्वर्थः पृथगस्तीत्यर्थः अर्थरूपत्वमेवोदाहरन् दर्शयति २९ अहंरूपः अहंकारः स च त्रिवृत्
त्रिगुणात्मकः पुनश्च भूतरूपेण पंचविधः इंद्रियरूपेणैकादशविधः स्वराट् जीवरूपः तस्य जीवस्य
वपुरंडं जगत् यतो यस्मात् महदादिभ्यस्तथावभाति नन्वेतदेवं ततः किमित्येवं नः श्रुत्यैतत्तवाह ३०

एतावानेव योगेन समग्रेणेह योगिनः युज्यतेभिमतो ह्यर्थो यदसंगस्तु कृत्स्नशः २७ ज्ञानमे
कं पराचीनैरिंद्रियैर्ब्रह्म निर्गुणं अवभात्यर्थरूपेण भ्रांत्या शब्दादिधर्मिणा २८ यथा महानहं
रूपस्त्रिवृत्पंचविधः स्वराट् एकादशविधस्तस्य वपुरंडं जगद्यतः २९ एतद्वै श्रद्धया भ
क्त्या योगाभ्यासेन नित्यशः समाहितात्मा निःसंगो विरक्त्या परिपश्यति ३० इत्येतत्कथितं
गुर्वि ज्ञानं तद्ब्रह्मदर्शनं येनानुबुध्यते तत्त्वं प्रकृतेः पुरुषस्य च ३१ ज्ञानयोगश्च मन्निष्ठो नै
र्गुण्यो भक्तिलक्षणः द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ३२ ॥

एतद्वैरूप्येणैवार्थं सुखेन प्रतिपत्त्यर्थं संक्षेपेणानुवदति ३० अनेन च ज्ञानयोगेन भगवानेव प्राप्यो
ऽन्यथा भक्तियोगेनेत्याह ३१ हे गुर्वि नैर्गुण्यो ज्ञानयोगश्च मन्निष्ठो भक्तिलक्षणश्च योगः त
योः द्वयोरप्येक एवार्थः प्रयोजनं कोऽसौ भगवच्छब्दः उपलक्षणं ज्ञापको यस्य तदुक्तं गीतासु तेषा
मेवांतिमामेव सर्वं शब्दाहितेतरतो इति नन्वज्ञानयोगस्यात्मलाभः फलं शास्त्रेषु सर्वत्र गम्यते भक्तियो
गस्य तु भजनीयसर्वप्राप्तिः कुतस्तयोरेकार्थत्वमित्याशंक्य दृष्टांतेनोपपादयति ३२ ॥ ॥

११८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

118-P

अष्टादशि ना

यथावद्दर्शनात्परमात्मनो गुणानां माम्यो गुणातीतादिः एकत्ववायोर्मार्गो भेदग्रहस्त्रिभिरिन्द्रियैर्नी
यते चक्षुषा शुक्ल इति रसेन मधुर इति स्पर्शेन शीत इति तद्वद्भगवानेव तत्तद्रूपेणावगम्यते प्राप्तव्यमार्गो त्रिविध वर्जनं
मेवप्रपंचयति त्रिभिः २२ क्रिययासत्येन पचयाकृतेभियोगेः ... णां मीमांसाग्राम्येन्द्रिययोगेयेन २३
दानैः सर्वस्वादेः तपउपवासादिः स्वाध्यायः पुण्यपाठादि ३

२२
यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः एको नानेयते तद्वद्भगवान्शास्त्रवर्त्मभिः क्रि
यया क्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः आत्मेन्द्रियजयेनापि संन्यासेन च कर्मणां २३ योगे
न विविधाङ्गेन भक्तियोगेन चैव हि धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् २४ आत्म
तत्त्वावबोधेन वैराग्येण दृढेन च ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् २५ प्रावोचं भ
क्तियोगस्य स्वरूपं ते चतुर्विधं कालस्य चाव्यक्तगतेर्योऽन्तर्धावति जन्तुषु २६ जीवस्य संसृती
र्बह्वीरविद्याकर्मनिर्मिताः यास्वङ्ग प्रविशन्नात्मा न वेद गतिमात्मनः २७ नैतत्खलायोपदि
शेन्नाविनीताय कर्हिचित् न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च २८ न लोलुपायोपदि
शेन्न गृहारूढचेतसे नाभक्ताय च मे जातु न मद्भक्तद्विषामपि २९ श्रद्दधानाय भक्ताय
विनीतायानसूयवे भूतेषु कृतमैत्राय शुश्रूषाभिरताय च ३०

निष्कामस्य
इमयचिह्नेन सकाम
स्यानन्तमेवाद्वयमिति २५ सकामस्य मेयाप्येवंगो यपि भगवत्प्रवर्तकगुणांशब्रह्मपरमिवर्षः यैभि
र्वेद्यैभिः स्वदृक् स्वप्रकाशः तदेवं ज्ञानयोगमुपसंहृत्य तस्य च भक्तियोगत्वसमानाधिकरणमुक्ता भक्तियो
गस्वरूपमेदर्शनं २५ चतुर्विधं त्रिगुणात्निर्गुणभेदेनं यो धावति उत्पत्तिनियमनादिकरोति २६
नकथयामास्ति अत्र्यक्तगतेरज्ञातस्वरूपस्य १

लोलुपाय लुब्धाय गृहारूढचेतसे गृहकार्ये बद्धचित्ताय
मद्भक्तिहीनाय मद्भक्तिं ये द्विषंति तेभ्योपि २
अविनीताय उद्धताय स्वाभिमानाय २

श्री
भाग
टी
११९

देश्यं गृहेष्वासक्तः उपदेशेन यत्किंचित्कारिणि न यत्किंचित् निंदा भवो खलाय परोद्वेगकारिणे अविनीताय उद्धताय धर्मध्वजा
य दांभिकाय अधिकारिणमाह द्वाभ्यां तच्छ्रवणकीर्तनपरस्याभिमतपदप्राप्तिरेव फलमित्याह य
प्रसूयवे पुरुषः सोपि मत्पदवीमेति हि निश्चितं ४२ इति श्री भावार्थदीपिकायां तृतीये द्वात्रिंशः ३२ कपिलं
प्रति तस्य वेदव्यासोपदेशानंतः ध्याननाभ मननन्नाम्ना जीवन्मुक्तिं स्तूयते विस्रस्तं दुःप्रपंचपटलं मायाव
रणं यस्याः तत्त्वानां विषयः ते नांकिता सिद्धिः मोक्षस्तस्य भूमिं तं प्रवर्तकं १ अथापि त्वावाकीन

वहिर्जातविरागाय शांतचित्ताय दीयते निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः ४३ य इदं
शृणुयादंब श्रद्धया पुरुषः सकृत् यो वाभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ४४ इति श्री भा
गवते तृतीयस्कंधे द्वात्रिंशोऽध्यायः ३२ श्रीमैत्रेय उवाच एवं निशम्य कपिलस्य वचो
जनित्री सा कर्दमस्य दयिता किल देवहूतिः विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्व
विषयांकितसिद्धिभूमिं १ श्रीदेवहूतिरुवाच अथाप्यजोंतःसलिले शयानं भूतेंद्रियार्था
त्ममयं वपुस्ते गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः २ ॥ ॥ ॥

रेवाजो पितृवपुः केवलं दध्यौ न तु दृष्टवान् स त्वं स्वयमेव तव जठराब्जजातः स एव भवानेव वि
श्वस्य सर्गादि विधत्ते न तु तत्र वस्तु सर्गादिकर्तृता काचित् दृष्टिः प्रवर्तते स त्वं मे मयाकथं ज्ञेय इति श्या
णामन्वयः कथं भूतं वपुः सद्य एतत् दृष्टं तेनांतः सलिले शयानं तव कीदृशं भूतानि चेंद्रियाणि चा
र्थाश्च आत्मा च मनः एतन्मयं एतद्रूपं तस्माद्गुणप्रवाहं तस्मिन्नेवाविद्यमानमितः ततः अ

निरवधि प्रलयकालीनोदधिजलमध्ये विहतनिवासं २

दृष्टिया श्रोतारी
निर २
नि २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

119-A

कथंभूतो भगवान् सर्गादि विधत्ते गुणप्रवाहेण विभक्तं वीर्यं शक्तिर्येन तथा सः शक्तिद्वारेण विधत्ते
न साक्षादित्यर्थः यतः अनीहो निष्क्रियः न हि कर्तृत्वं शक्तिद्वारेणापि कथं सर्गादि विधत्ते अवितथाभि
संधिः सत्यसंकल्पः किमर्थं विधत्ते आत्मनां जीवानामीश्वरः जीवानां भोगार्थमित्यर्थः ननु कथमेकस्य
विविधविज्ञानभोगान् विदध्यात् अतर्क्याः सहस्रमपरिमिताः शक्तयो यस्य किं च परमाश्चर्यं यस्योदर एतद्वि
श्वमासीत् स त्वं मया जठरेण कथं भृतः न तु शिशुपालनादिकं मे न दुर्घटमनेनेत्याह वटपत्र इति अङ्घ्रिपाः

स एव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्तवीर्यः सर्गाद्यनीहोऽवितथाभिसंधिरात्मे-
श्वरोऽतर्क्यसहस्रशक्तिः ३ स त्वं भृतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत् वि-
श्वं युगान्ते वटपत्र एकः शेते स्म मायाशिशुरङ्घ्रिपानः ४ त्वं देहतन्त्रः प्रशमाय पाप्मनां नि-
देशभाजां च विभो विभूतये यथावतारास्तव सूकरादयस्तथायमप्यात्मपथोपलब्धये ५
यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् श्वादोऽपि सद्यः सवनाय कल्पते

यथा युगान्ते वटपत्रे एक एव मायाशिशुः शेते स्म २

दोरङ्गुष्ठं पिबतीत्यङ्घ्रिपानः रटन्नपि पिपासुर्वेत्तद्वदेव माययेति भावः ४ प्रयत्नवानपि त्वं मया प्रसूत इत्येतत्स्वभावान्न वेद
हे भृतः किं देहतन्त्रो यदा एवं नारदादिभिः पापवानपि भूतोऽसीत्याह देहतन्त्र इति स्वीकृतमूर्तिः दर्शनीय पापानां उद्धा
नां निदेशभाजां भक्तानां विभूतये ऐश्वर्याय आत्मपथोपलब्धये ज्ञानमार्गप्रकटनाय अत एव
दर्शनात् किं नाम आश्चर्यमित्याह यन्नाम ५ यन्नामधेयस्य श्रवणानुकीर्तनेन च तस्मात् किं वक्तव्यं
दर्शनादपि श्वादोऽपि सवनाय सोमयागाय कल्पते योग्यो भवति किं पुनस्तव दर्शनात्

यथा वराहावतारादयः देहा नाशाय यास्तथा त्वमपि २ विप्रवत् २

यस्य भगवतो २

हे भगवन् ते तव दर्शनात् सोमयागाय कुलीनः कल्पते किं न सम्यग्भवति १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

120

श्री० भा० त० टी० १२१

अहो वत तेषां येषां यस्य जिह्वाग्रे नव नाम वर्तते स श्वपचोप्यतः अस्मादेव हेतोः गरीयान् यद्यस्मात्तदेतोः वं
वृतेन पतत्र अतिथ्योऽनेनं तु इत्यत आह तेपुर्वतपस्ते जुहुवुः सस्नुः आर्या ब्रह्मानूचुर्नाम गृणन्ति ये ता आ
याः सदाचाराः वेदवेदमनूचुः अधीतवंतः त्वन्नामकीर्तनेनैव अग्न्याधान भूतं अनन्तस्य गुणपतनमाद्यस्यैः य
ह्यानं यातं तेरस्तेषां सर्वपापोह्यो मा ते सर्वं कृतमिति त्वन्नामकीर्तनेन महाभागे सर्वं वा मते उ सर्थः ७ अ

अहो वत श्वपचोतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यं तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मा
नूचुर्नाम गृणन्ति ये ते ७ तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यं स्वतेज
सा ध्वस्तगुणप्रवाहं वन्दे विष्णुं कपिलं वेदगर्भं ८ श्रीमैत्रेय उवाच ईडितो भगवानेवं
कपिलाख्यः परः पुमान् वाचाविक्लवयेत्याह मातरं मातृवत्सलः ९ श्रीकपिल उवाच
मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे आस्थितेन परां काष्ठामचिरादवरोत्स्यसि १० श्र
द्धत्स्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः येन मामभवं यायाः मृत्युमृच्छन्त्यतद्विदः ११ मैत्रे
य उवाच इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिं स्वमात्रा ब्रह्मवादिन्या कपिलोनुम
तो ययौ १२ सा चापि तनयोक्तेन योगादेशेन योगयुक् तस्मिन्नाश्रमे आपीडे सरस्वत्याः स

ध्वस्तो गुणानां प्रवाहो येन। तं त्वां कपिलावतारं वंदे इति स्तुतः परः पुमान् परमात्मा।

समाहिता तस्मिन्प्रसाद्य हृते आत्मनि मनसि संभाव्यं विश्वं वेदोऽभगीयस्यमः ८ अविक्लवया भीतया वाचा ९
हसेवेन मे मम मोदितेनास्थितेनानुष्ठितेन परां काष्ठां जीवन्मुक्तिमचिरादवरोत्स्यसि प्राप्स्यसि १० यतो हि इदं मम
मतं अविष्ठास्तः ११ अतु मतः अनुज्ञातः १२ सरस्वत्या आपीडे पुष्पमुकुटवत्स्थिते सरस्वत्या नितपादे पुष्पमुकुटे नेस्तेव

मत्युसंसारं उछंति प्राप्नुवंति ११ आत्मनो गतिं आत्मज्ञानं ब्रह्मपरमात्मानं १२

मद्यं मममतं श्रद्धत्स्व प्रतीहि येन मनैनानुष्ठानेन
अभयं मोक्षं याया यास्यसि

स्त्रा देवहूतिः तनयोक्तेन श्रीकपिलोक्तेन।

मातरं देवहूतिं मातृवत्सलः मातावत्सलाय सेति वा ३

इति श्रीभागवते महापुराणे तृतीयस्कंधे कपिलदेवहूतिसंवादे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

120-A

गृभीतान्तां त्रिभुवन्मवगाहः स्वान्तेनेन्तकपिशानपिशंगान सतृणजटिलानवेशान्तनगामात्मानंदेदूंचीर
धारिणांकृष्णांचविभ्रतीमसनोवृद्दनं किंचिदनिर्वाच्यशोकव्याकुलेनचकारोतिषष्टेनान्वयः २४ प्रजापतेकं
टेमस्तनपोयोगाभ्यामनिपार्थितेस्वर्गाद्देस्थां दिव्याप्तश्रेष्ठेनेश्वरविरहातनरासनीं (वद्दनेकिंचिदनिर्वाच्य
शोकव्याकुलेनचकारेतिषष्टेनान्वयः) २५ यत्रगाहेस्थ्योदीरकेणानि भासुरुश्राः प्राप्याग्रा स्तरणा

गृभीतांगावगाढकपिशानजटिलानकुटिलालकान भ्रान्मानंवोग्रतपसाविभ्रतीचीरणोह
पाम २४ प्रजापतेः कटेमस्थतपायोगाविजृंभितं स्वर्गाद्देस्थमनोपमंप्राप्यवैमानिकैरपि
२५ यय: फणानिभूः शाल्याटानाफकपरिष्ठुटाः आसनानिवह्नेमानिस्वर्णास्तरणा:
निच २६ स्वच्छस्फाटिकहर्म्येषु महामारकतेषुचरत्नमदीपाआभातिवलतारत्नमयूनाः २७
गृहोद्यानेकुसुमितेरम्यवहुसरःगुमैः हंसकेलिसिघ्नेगायन्मत्तमधुवते २८ यत्रप्रवि
ष्टमात्मानंविबुधानुचरागनः शुःवापाशुस्तलगोधन्माकटेमनोपलालितम २९ दिव्यास्त्री
भिनतमव्याविरुलयोषितां किंचिच्चकारवृद्दनेपश्चविलोपतानवा ३०

टंता। हैमानिस्वैवर्णानि। कौमलानि।

निर्मोनिर्टनवटितामं वकाश्वमत्तांमयपरिकराः आसनानिपीठादीनिस्वस्पर्शास्तरणानियेषु
२६ २७ वहूरमे २८ यत्रोद्यानेप्रविष्टमात्मानेदेवहूतिरिति २९ देदूस्त्रीणांमपिडस्मितनः
मेयानुस्मितनमतन दिव्यास्त्रीभिमानेनमनकासहादयामपउः सदमेनामाह ३० ॥ ॥

कृतानिकैः कुजैर्वहुभिरमाकुमैः २

सावरुलयोषितामार्वडलईडलस्पया
योषितास्तसामपिईस्मितनमं ३१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तमेवध्यायतीति तमेव हरिं देवं [illegible] ध्यायन्तीत्यन्वयः

121

श्री भाग टी १२१

नष्टेवत्सेवत्सलागौरिवाभूदितिविरहहेतुतद्ध्यानफलमाह २१ विरहहानिर्वासनावत्सविदुर २२ क
पिलं सुतोपदेष्टारं तद्भगवतोरूपं ध्यायन्ती तं स्वात्मानं विश्वतोमुखं सर्वगतं च ध्यायन्ती ब्रह्मण्यवस्थितम
तिर्बभूवेतितत्त्रिभिरन्वयः २२ केन ध्यायन्ती विशुद्धेन मनसा विशुद्धे कारणमाह भक्तिप्रवा
हरूपेणयोगेन युक्तानुष्ठानेनज्ञानेनचगीतासु [illegible] विहारस्य युक्तचेष्ट
स्य कर्मसु युक्तस्वप्नावबोधस्य योगो भवति दुःखहेति ब्रह्महेतुना ब्रह्माप्तिकारणेन २४ विश्वतोमु

शुद्धेनात्मनामनसा आत्मानं परमात्मानं

वने प्रव्रजिते पत्न्यावुपमे विरहातुरा। ज्ञाततत्त्वाप्यभूत्त्रष्टे वत्से गौरिव वत्सला ॥२१॥ तमेव ध्याय-
ती देवमपत्यं कपिलं हरिं। बभूवाचिरतो वत्स निःस्पृहा तादृशे गृहे ॥२२॥ ध्यायती भगवद्रूपं यद-
दाह ध्यानगोचरं। सुतः प्रसन्नवदनं समस्तव्यस्तचिन्तया ॥२३॥ भक्तिप्रवाहयोगेन वैराग्येण
बलीयसा। युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना ॥२४॥ विशुद्धेन तदात्मानमात्मना विश्वतो-
मुखं। स्वानुभूत्या तिरोभूतमायागुणविशेषणं ॥२५॥ ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्र-
ये। निवृत्तजीवापत्तित्वात्क्षीणक्लेशाप्तनिर्वृतिः ॥२६॥ नित्यारूढसमाधित्वात्परावृत्तगुणा

अवस्थिता स्थिरा मतिर्यस्याः २

खं स्वेहेत स्वानुभूत्या प्रकाशेन तिरोभूतं मायागुणैर्विशेषणैरुपाधिर्यस्य २५ कथंभूता ब्रह्मणि
जीवानां संश्रये भगवति तत्स्थाने जीवं स्वसुक्तिमाह सार्धैस्त्रिभिः तदा एवं तेहरि जीवापत्ति जीवभावो यः
स्यांभावः तत्त्वेतस्माद्विगतः क्लेशाश्च निर्वृतिस्त्वात्मा तेन जीवन्त [illegible] तत्र तत्रायागुणानां
विद्यमानतानां [illegible] नसंस्मरणेनज्ञात २७ नित्यारूढो [illegible] समाधिर्यस्याः तस्याभावस्तत्त्वं तेन

देहे २

१२१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवंश्रीकपिलोपदिष्टमार्गेणापरंब्रह्मआत्मानंसर्वव्यापिनं२
उपेयुषीप्राप्ता२

परतः परैरभिरेवकर्दमसृष्टविद्याधरीभिः पोषणेऽपस्याधिमेनोत्पन्नाभिः तदसंभवात्कृशोमलैरवच्छन्नोऽपिबभौ २८ देवगु
प्तेशरीरस्वकर्मपालितेनिर्वाणमिन्मुक्ते २९ हेवीरविदुर ३१ सोऽम्पनत्त्यायास्तन्मर्त्यंशरीरंसरिदभूत कथंभूतेयोग
नविधुतान्विलीनाम्मर्त्याद्दैहिकाधातवमलायस्यकपिलोयपाविरमुक्ते तदेवप्रपंचयन्निर्विमिः ३२ समनुज्ञाप्य

तद्देहःपरतःपोषोऽप्यकृशश्चाध्यसंभवात् बभौमलैरवच्छन्नःसधूमइवपावकः २८ स्वांगंतपोयोगमयं
मुक्तकेशंगतांबरं दैवगुप्तंनबुबुधेवासुदेवप्रविष्टधीः २९ एवंसाकपिलोक्तेनमार्गेणाचिरतःपरं आ
त्मानंब्रह्मनिर्वाणंभगवंतमवापह ३० तद्वीरासीत्पुण्यतमंक्षेत्रंत्रैलोक्यविश्रुतं नाम्नासिद्धपदंयत्र
सासंसिद्धिमुपेयुषी ३१ तस्यास्तद्योगविधुतमार्त्यंमर्त्यमभूत्सरित् स्रोतसांप्रवरासौम्यसिद्धिदासि
द्धसेविता ३२ कपिलोऽपिमहायोगीभगवान्पितुराश्रमात् मातरंसमनुज्ञाप्यप्रागुदीचींदिशंययौ ३३
सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः स्तूयमानःसमुद्रेणदत्तार्हणनिकेतनः ३४ आस्तेयोगंसमा
स्थायसांख्याचार्यैरभिष्टुतः त्रयाणामपिलोकानामुपशान्त्यैसमाहितः ३५ एतन्निगदितंतातयत्पृष्टो
ऽहंतवानघ कपिलस्यचसंवादोदेवहूत्याश्चपावनः ३६ यइदमनुशृणोतियोऽभिधत्तेकपिलमुनेर्मत
मात्मयोगगुह्यं भगवतिकृतधीःसुपर्णकेतावुपलभतेभगवत्पदारविंदं ३७ इतिश्रीभागवतेम
हापुराणेतृतीयस्कंधेश्रीशुकदेवपरीक्षित्संवादेविदुरमैत्रेयकथनेदेवहूतिसमाधिवर्णनंनामत्रयस्त्रिं

नुज्ञांप्राप्तोसंसाम्य ३३ दत्तंअर्हणंपूजांनिकेतनंवस्थानंयस्मै ३४ उपशान्त्यैसमाहितेस्थितः ३५ प्रकारान्त
रेणउपसंहरति एतदितिद्वाभ्यां ३६ तत्श्रवणकीर्तनफलमाहयइति सुपर्णकेतौगरुडध्वजे उपलभतेप्राप्नोति ३७
इतिश्रीभागवतेमहापुराणेश्रीभावार्थदीपिकायांतृतीयस्कंधेटीकायांश्रीधरस्वामिविरचितायांत्रतीयस्कं।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३ तृतीय समाप्तः पत्रे १२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative